
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/ अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विक्रम सवंत)	Additional Particulars / Remark
हरिश्चंद्रोपाख्यान	-	काव्य	पूर्ण	-	3/12	82	संस्कृत	कागद	11	39		

M - 2962

॥ श्री शिव ॥ ॥ हरिश्चंद्रोपाख्यानपुस्तकं विष्णुखेडोंस्य ॥

॥१॥ श्रीगणेशाय नमः ॥ जयति पराशरसूनुः सत्यवतीहृदयनंदनो व्यासः ॥ यस्यास्यकमलगलितं वा-
ङ्मयममृतं जगत्पिबति ॥ १ ॥ अतसीपुष्पसंकाशं पीतवाससमच्युतं ॥ दयालुं शेषशायीनं महावि-
ष्णुमुपास्महे ॥ २ ॥ शौनक उवाच ॥ कस्माद्विवादः संजातो विश्वामित्रवसिष्ठयोः ॥ तत्सर्वं सूत माचक्ष्व
कथां पुण्यामशेषतः ॥ ३ ॥ सूत उवाच ॥ श्रूयतामभिधास्यामि कथां पौराणिकीं शुभां ॥ वैदिकाख्या-
नमेतद्धि कथयामि च शौनक ॥ ४ ॥ एतदाख्यानमतुलं सर्वपापक्षयपरं ॥ इदं श्रुत्वा नरो ब्रह्मन्
सर्वपापैः प्रमुच्यते ॥ ५ ॥ हरिश्चंद्र इति ख्यातो राजाकृतयुगेभवत् ॥ धर्मात्मा पृथिवीपालः सत्यवा-
दी दृढव्रतः ॥ ६ ॥ न दुर्भिक्षं न च व्याधिर्नाकालमरणं नृणां ॥ नाधर्मरुचयः पौरास्तस्मिंच्छासति
पार्थिवे ॥ ७ ॥ बभूवुर्न तथोन्मत्ता धनवीर्यतपोमदैः ॥ सर्वकामफलावृक्षाः सर्वकामफलार्जनाः ॥ ८ ॥
तस्यानुशासतः सर्वं ब्रह्मन् राज्यं महीक्षितः ॥ देवेंद्रस्य सभायां तु विवादः सुमहानभूत् ॥ ९ ॥
शृण्वतां सर्वदेवानां विश्वामित्रवसिष्ठयोः ॥ एकदा तु गतः स्वर्गं विश्वामित्रस्तपोनिधिः ॥ १० ॥ द-
दर्शाथ सभां दिव्यां सर्वदेवैः समन्वितां ॥ गंधर्वैः पन्नगैर्यक्षैः सिद्धचारणकिन्नरैः ॥ ११ ॥ गणेशपुरसां ॥१॥

रु४

चैव नारदाद्यैः सुरर्षिभिः ॥ सिंहासनगतं देवं सर्वदेवैर्नमस्कृतं ॥१२॥ पूजयामास देवेंद्रो विधिदृष्टेन कर्म
णा ॥ एतस्मिन्नंतरे तत्र वसिष्ठो मुनिपुंगवः ॥ तं चाभ्यर्च्य यथान्यायं सहस्राक्षो महामुनिं ॥ उपा
मक्रोच्छक्रः सर्वदेवसमन्वितः ॥ मुनिना नामयं पृष्टः प्रश्रयावनतोब्रवीत् ॥ इंद्र उवाच ॥ तव पादांबु
जस्पर्शात् कृतार्थोस्मि द्विजोत्तम ॥ अद्य मे सफलं जन्म जीवितं च सुजीवितं ॥ इत्यादिविनयप्रोक्तो
देवराजो तपोधनं ॥ पप्रच्छ पुनरप्येनं क्षितीशानां कथानकं ॥ ब्रह्मन्न चार्कवंशस्थः कोन्नपो भुवि सां
प्रतं ॥ एवं पृष्टे वसिष्ठेन सर्वं नारद उक्तवान् ॥ नारद उवाच ॥ हरिश्चंद्र इति ख्यातः सूर्यवंशभवो नृपः ॥
प्रतापेनार्कतुल्यो सौ शत्रुपक्षक्षयंकरः ॥ रूपेण कामसदृशः श्रद्धावज्जनवल्लभः ॥ कृष्णावाणीशास
दृशः सर्वशास्त्रविशारदः ॥ यज्ञदानतपःसत्यक्षमार्जवपराक्रमैः ॥ इंद्रोपि विजितस्तेन नोपमा तस्य
विद्यते ॥ देव किं बहुनोक्तेन धर्मे सत्ये किलस्थितः ॥ धर्मोपि विजितस्तेन सत्येन कथयाम्यहं ॥ वपं चक्रोप्य
दमे तस्यां भुवि चीर्णं तपः पुरा ॥ नमस्यामि तथाभूतं राजानं सत्यवादिनं ॥ गुणास्तस्य न शक्यंते वक्तुं
वर्षशतैरपि ॥ हरिश्चंद्रसमो राजा न भूतो न भविष्यति ॥ एतद्धि ख्यातु धर्मज्ञो विस्मान्विस्मतमेक्षत ॥

॥२॥ सत्वावगामकामोहि हरिश्चंद्रस्य भूपते ॥ विश्वामित्रस्त तस्तस्मिन्नारदं प्रत्यभाषत ॥ पूर्ववैरमनुस्मृत्य वशिष्ठे
न महात्मना ॥ विश्वामित्र उवाच ॥ नारदैवंवचो मिथ्या न वदंति हि ते समाः ॥ क्रोधमोदधिको लोके क्रोधेनैव
निस्तम ॥ वीर्येणापि सुरेंद्रेण प्रतापेनार्कतोसन ॥ बुध्या वागीशसदृशो विषते न्यो जगत्त्रये ॥ को हि नाम पु
मान्लोके राज्यस्थः समदान्वितः ॥ सुकृतः सत्येहि सततं नेतष्क्रोतुं क्यं क्षमाः ॥ न वदंति वचो मिथ्या ब्रह्मपु
त्रा भवद्विधाः ॥ वशिष्ठं श्रीगुणं हित्वा हरिश्चंद्र पुरोहितं ॥ इति श्रुत्वा वशिष्ठस्तु युगं ताग्नि रिवोत्थितः ॥
विश्वामित्रं ततः प्राह कोपादरुणलोचनः ॥ वशिष्ठ उवाच ॥ रे क्षत्रबंधो निर्लज्ज मा वदस्व ममाग्रतः ॥ म
हापातकिना तुल्यो हरिश्चंद्रं हि निंदति ॥ यज्ञदानतपः सत्यक्षमार्जवपराक्रमैः ॥ ख्यातस्य कुरुते निंदां
यासो पातकिनासमः ॥ वायुर्निश्चलतामेति वह्निर्वा निश्चलतां व्रजेत ॥ न तु राजा हरिश्चंद्रः सत्यं सज
ति कर्हिचित ॥ विश्वामित्र उवाच ॥ ब्रह्मबंधो त्वदुक्तं यत्तदस्तु मम पातकं ॥ यदि धैर्ये च्युतिं तस्य न करो
मि महीपतेः ॥ यज्ञ्ह्मण हरणं नाम्ना मा वध्या द्यातदस्तु मे ॥ यदि धैर्य्ये च्युतिं तस्य न करोमि महीपते ॥ पर
स्त्रीगमनात्पापं स्त्रीवधाद्यापि यद्भवेत ॥ ग्रामदाहाभिघाताद्वा विषदानाच्च यद्भवेत ॥ देवालयप्रपावे ॥२॥

दहनो दाहविनाशकृत ॥ वापीकूपतडागानां भेदनाद्धि हरणात्तथा ॥ विश्वासस्य च घाताद्वापि हतघ्नस्य
च पातकं ॥ यदि धैर्यच्युतिं तस्य न करोमि महीपते ॥ ब्रह्मस्वहरणात्पापं देवस्वहरणात्तथा ॥ पुनर्द
नाच्चकं न्यायायत्पापं स्यात्तदस्तु मे ॥ यदि धैर्यच्युतिं तस्य न करोमि महीपतेः ॥ वृद्धानामपमानाच्च
कूटसाक्षेश्च पातकं ॥ रसभेदात्स्वंकिभेदाद्देवब्राह्मणदूषणात् ॥ भार्यायामनुलोपाच्च यत्पापं स्या
त्तदस्तु मे ॥ यदि धैर्यच्युतिं तस्य न करोमि महीपतेः ॥ पश्यतो भस्य वर्गस्य मित्राणामतिथेस्तथा ॥ ए
कोमिष्टान्नभुंक्ते तु विमुखे चातिथौ गते ॥ पुत्रभस्य कलत्रादिबंधुवर्गमकिंचनं ॥ दुर्भिक्षसंभवे चापि
परित्यज्यति यो नरः ॥ स्वपोषणपरस्तस्य यत्पापं स्यात्तदस्तु मे ॥ यदि धैर्यच्युतिं तस्य न करोमि मही
पतेः ॥ असच्छास्त्रोपदेशाच्च यैर्दत्तायेश्च मंत्रिताः ॥ भार्यापत्योश्च ये केचिद्भेदं कुर्यु नराधमाः ॥
परोपतापकश्चैव ये चाल्हादविभेदकाः ॥ मर्माणि पश्च साधूनां वदन्वाग्भिर्निहंतति ॥ शरणागतं त्य
जति यो लोभाद्कृतजीदितः ॥ न्यासापहारिणस्तेषां यत्पापं स्यात्तदस्तु मे ॥ यदि धैर्यच्युतिं तस्य न करो
मि महीपतेः ॥ वशिष्ठ उवाच ॥ चंद्रादित्यो पतितो च मेरोश्च चलनं भवेत् ॥ एकार्णवं जगद्वापि पृथि

॥३॥ ध्याः परिवर्त्तनं ॥ वायुसूर्याग्निमेरूणां प्रवृत्ते श्चलनं भवेत् ॥ तदा धैर्यच्युतिस्तस्य हरिश्चंद्रस्य जायते ॥ त्रै
लोक्यपि जगतिं जह्यात्स्वपूर्णाभ्यः कदाचन ॥ तथापि भूपतेस्तस्य सत्यत्यागो न जायते ॥ व्यसनासक्तचित्तोपि
स्त्रीसहस्रैः समन्वितः ॥ स्वप्नांतरेप्यसौ राजा न ब्रूते चान्रृतं कचित् ॥ ब्रह्मन्नेतं हं प्रवदाम्यामि यास्यामि धर
णीतलं ॥ यदि धैर्यच्युतिस्तस्य हरिश्चंद्रस्य जायते ॥ विश्वामित्र उवाच ॥ अनेन किं प्रलापेन श्रुणु स्वविन
वणे न च ॥ नियुक्तोसौ मया राजा महाकोशेन नेक राग ॥ वशिष्ठ उवाच ॥ यदि धैर्यच्युतिस्तस्य हरिश्चंद्रस्य
नो भवेत् ॥ तदा मुने पणः कृस्ते देवानां पुरतो वद ॥ विश्वामित्र उवाच ॥ हरिश्चंद्र मसत्यं चेन्नकरोमि महो
पतिं ॥ तर्हि तस्यास्सक्तयस्सर्वं मयाथ ध्वरितं तपः ॥ सूत उवाच ॥ एवमुक्ते तु वचने वशिष्ठः क्रोधमूर्छितः ॥
उवाच तूर्णमुत्थाय बाहुमुद्यम्य दक्षिणं ॥ वशिष्ठ उवाच ॥ श्रृण्वंतु ऋषयः सर्वे प्रतिज्ञां ममामरैः सह ॥
सिद्धचारणगंधर्वास्तथैवोरगराक्षसाः ॥ ऋषिवेषधरस्याथ श्रृण्वंतु वचनं मम ॥ सत्यं त्यजति चेद्राजा
हरिश्चंद्रो महायशाः ॥ उपवीतादिकं त्यक्त्वा तर्हि चांडालवेषमुनि ॥ दक्षिणाभिमुखो नग्नस्तु धवेस्तो
मुक्तमूर्द्धजः ॥ आदरेणाश्वपालेन सुरापानं करोम्यहं ॥ इत्युक्तो मुनिशार्दूलो राकेणविनिवारितो ॥ ॥३॥

संबोध्य तौ द्विजश्रेष्ठौ प्रेषिताववनीतलं ॥ प्रयातौ स्वाश्रमाभ्यासं क्रोधयुक्तौ परस्परं ॥ वशिष्ठस्तु तत
स्वर्णमयोध्यामगमन्मुनिः ॥ प्रविश्य तां पुरीं रम्यां राज्ञो भवनमाविशत् ॥ आगतं तं मुनिं दृष्ट्वा राजा त
षि समन्वितः ॥ पादयो वंदनं कृत्वा सन्निविष्टो वरासने ॥ वशिष्ठं पूजयामास मधुपर्कादिपूजया ॥ उपस्था
मकरोत्तस्य हरिश्चंद्रो महीपतिः ॥ मुनिना नामयं पृष्टः प्रश्रयावनतोऽब्रवीत् ॥ हरिश्चंद्र उवाच ॥ तव पा
दांबुजस्पर्शात्कृतार्थोऽहं द्विजोत्तम ॥ अद्य मे सफलं जन्म जीवितं च सुजीवितं ॥ चरणौ ते मया दृष्टौ बहुभि
र्दिवसैर्मुने ॥ कालोयं संनतिक्रांतः श्रुते तातो च्युतां मया ॥ वशिष्ठ उवाच ॥ राजन्देवपुरे वृत्तमद्भुतं सांप्र
तं महत् ॥ विश्वामित्रेण संवादो मम जातो महीपते ॥ राजोवाच ॥ जातोयं विस्मयो त्वत्तं द्विजेंद्र वचना
त्तव ॥ वृत्तांतमद्भुताकारं सर्वं कथय विस्तरात् ॥ एवं पृष्टे नृपेणाथ कथयित्वा सुविस्तरात् ॥ विश्वामित्रेण
संवादं यथा जातं सुरालये ॥ पुनः प्राह वशिष्ठस्तु हितं कार्यमनागतं ॥ वशिष्ठ उवाच ॥ अत ऊर्ध्वं न गंतव्यं
विश्वामित्राश्रमं प्रति ॥ यदि त्वमात्मनो भूरि राज्यमिच्छसि भूपते ॥ स्पर्धते हि त्वया सार्धं प्राणैरपि धनै
रपि ॥ एवमुक्तो वशिष्ठेन हरिश्चंद्रोऽब्रवीद्वचः ॥ तव प्रसादमंत्रेण राज्यं भुवि समाकुलं ॥ करोमि मुनिश्र

॥५॥ दूलतवाक्षाप्रतिपालनं॥ त्वंहि नः परमो धर्मस्त्वं हि नः परमो गुरुः॥ त्वं हि नः परमस्त्राता त्वं हि नः परमा गतिः॥
वसिष्ठस्य ततः प्रोक्तो भूरिभद्रं तवास्त्विति॥ विसालुष्ठानसिध्यर्थं मुनीन्द्रो जगाम्ह वौ गतः॥ ७६॥ इ
ति श्रीपद्मपुराणे पातालखंडे हरिश्चंद्रोपाख्याने प्रथमोध्यायः॥१॥ सूत उवाच॥ एकदा तु हरिश्चं
द्रः सर्वसैन्यसमन्वितः॥ रथमास्थाय विपुलं किंकिणीजालशोभितं॥ मुकुंदुरंगमैः श्रेष्ठैर्व्याघ्रचर्म
परिष्कृतं॥ हस्त्यश्वरथसंघातैः पटहैश्च समन्वितः॥ आस्थाय सुमहचानं प्रतिगृह्य सशरं धनुः॥
स्कृपमानो महातेजा मृगयां निर्ययौ तदा॥ मणिकांचनचित्रांगं समंतात्पुष्पभूषि तं॥ हत्वा मृगांश्च
राहांश्च शार्दूलान्महिषांस्तथा॥ हत्वा सिंहांस्तथा व्याघ्रान्क्षुद्रानृक्षान्व्यादकांस्तथा॥ संपस्पासमनपुत्रेश्च
चक्रश्च विपुलं वनं॥ शंखवादित्रनिर्घोषैर्भेरीणां तु मुलं महत्॥ अंतराले ततो लेभे विश्वामित्रो महात
पाः॥ मायया तु मृगं कृत्वा दर्शनीयं मनोरमं॥ विससर्ज वनं तत्र यत्रास्ते स नृपो बली॥ दृष्ट्वा स तं मृगं रा
जा ह्याकृष्य सशरं धनुः॥ मृगेनाकर्षितो राजा कौशिकस्याश्रमं प्रति॥ ततो दृष्ट्वाश्रमं तस्य सर्वसत्वैर्नि
षेवितं॥ वृक्षैः पुष्पैः फलोपेतैः स राजा विस्मयान्वितः॥ हरिश्चंद्र उवाच॥ कस्यैतदाश्रमपदं मनसो ल्हाद ॥५॥

कारकं॥ विगताश्चुत्पिपासा च श्रम श्च विगतो मम॥ मार्जो रभ्रूषकावेतावबलेहमि यस्थितौ॥ दृष्ट्वाश्र
मं धनुष्पाणिः रथादुत्तीर्य वीर्यवान्॥ विनीतवेषाभरण आश्रमं प्रविवेश ह॥ पत्नीपुत्रसमायुक्तोऽस
क्षितश्च द्रयान्तदा॥ अश्वान्नागान् रथापत्तीन् बहिः संस्थाप्य बुद्धिमान्॥ विनीतवेषाभरण आश्रमस्यां
तरं गतः॥ छायां सुस्त्रीतलां दृष्ट्वा काप्यसौ निषसाद ह॥ दैवोपहतचित्तस्तु निद्रया परिमोहितः॥ श्रमा
न्वितो हंसु श्रोणि रथवेगेन खेदितः॥ तयोः संगे शिरः कृत्वा श्यामो हसुम ध्यमे॥ इत्युक्त्वातिप्रियां
भार्यां प्राणेभ्योपि गरीयसी॥ तथेत्युक्ते स्तपा तत्र सुखापन्न पतीश्वरः॥ सुस्तत्यसः सहसोत्थाय बाष्प
पर्याकुलेक्षणः॥ न चोभव्य स्वया शापः शिष्पोहं तव कोशिक॥ अश्रुपूर्णमुखं दृष्ट्वा भर्तारं सा पतिव्र
ता॥ प्रावेपत भयोद्विग्ना प्रवाते कदलीयथा॥ चं दृष्ट्वा तु वाच॥ देवासुरसमूहेषु महासमरसंकटे॥ भीता
नामभयं दाता कथं ते भयमागतं॥ राजोवाच॥ शोकः स्वप्नो मया दृष्टो स्वत्तेन वरवर्णिनि॥ तेन मे हृदयं
त्रस्तं कंपते तीव भामिनि॥ पश्याम्यत्रागतं विप्रं विश्वामित्रं तपोनिधिं॥ राज्यस्य पस्थय स्वस्य तस्यार्थे
मया च तं॥ दीयतां वसुधां मह्यं सुवर्णं स्यन्दक्षिणा॥ ततो दत्ता मया तस्मै कौशिकस्याथ याचतः॥ ततो

॥५॥ हं चलितं तस्यापि नागराश्च परिभ्रमः ॥ स्त्रियो बाष्पयुतास्तस्थुर्बालवृद्धा हयंतिभयानकाः ॥ भग्नदंडं तथा छत्रं
पद्मस्यापि पतितं भुवि ॥ तोरणानि च चारूणि त्रुटितान्युपलक्षितैः ॥ दग्धा नंद्यो ध्वजा पद्मस्यापि गृहद्वारक
तोरणं ॥ तथा कांतापुरं रम्यं रेवरं सर्वतोमुखं ॥ द्वारैश्चतुर्भिर्विस्तीर्णैर्मुक्तादामविभूषितैः ॥ मध्या
न्हार्कप्रकाशेन परतोजोपमर्दिना ॥ ...तकुंभेन महता प्राकारेणास्य मन्वितं ॥ तस्मिन्पुरवरे दिव्ये स्थि
तो हं तनुमध्यमे ॥ चंद्रवत्कुर्वा ॥ एवमेतं महाराज यद्दृष्टं तु लयानघ ॥ अवश्यं व्यसनं घोरं भविष्यंति
नसंशयः ॥ श्रुत्वैतत्तु वचो राजेंद्र महतो ...भेनेश्च्युतो ॥ घातयंति दिशः सर्वाः पपात धरणीतले ॥
निर्घातस्तु महान्रौद्रो मुनीकंपश्च दारुण ॥ तथापि जन्मनक्षत्रे वक्रं भंगारकः स्थितः ॥ एतद्दैवोपघा
तस्य विपरीतमिदं स्थितं ॥ जपैर्नियमदानैश्च कोटिहोमैः प्रयास्यति ॥ भवोपकृत्स्तथा वारे देवता
तिथिपूजकः ॥ ३२ ॥ इति श्री पद्मपुराणे पातालखंडे हरिश्चंद्रोपाख्याने द्वितीयोध्यायः ॥ २ ॥ शौनक उ
वाच ॥ केन पुण्येन संप्राप्तं नगरं दिव्यतोमुखं ॥ तत्सर्वं वद मे सूत कथा पुण्या सुविस्तरात् ॥ सूत उवा
च ॥ विमानमधिरूढोसौ हरिश्चंद्रो महीपतिः ॥ विस्मयाविष्टचित्तस्तु कदाचिद्गतो दिवं ॥ तावद्ददर्श ते ॥५॥

राजा मेरुशिखरिणां वरं ॥ तत्रास्ते सु महात्मानं द्वितीयइव भास्करं ॥ सनत्कुमारं ब्रह्मर्षिं ज्ञानयोगपरायणं ॥
दृष्ट्वा त्रीयसितं राजा प्रष्टुकामस्तदागतः ॥ ववंदे चरणौ तस्य तेनापि प्रतिवादितः ॥ सुखोपविष्टस्तु नृपः
पप्रच्छ मुनिसत्तमं ॥ हरिश्चंद्र उवाच ॥ भगवन्कुले नालोकेसं पत्प्राप्ता मयानघ ॥ कर्मणा केन लब्धेयं क
थ्याहं पूर्वजन्मनि ॥ एतत्कथय मे सर्वं मनुष्याद्योऽसि तेऽपि (?) ॥ सनत्कुमार उवाच ॥ यदाह पृथिवीपाल नत
थ्यच तदन्यथा ॥ किं दुर्लभतरा लोके विभूतिर्योद्भ्रनीतव ॥ कथयामि नरश्रेष्ठ तवानुग्रहकारणात् ॥ वैश्य
पुत्रस्तु नामासीच्छुचिस्त्वं पूर्वजन्मनि ॥ स्वकर्म वै परित्यज्य परप्रेषणलिप्सया ॥ नवप्रेषणदोहासी
काले दुर्भिक्षपीडिते ॥ ततः कदाचिद्गहने सरस्युत्फुल्लपंकजे ॥ दृष्ट्वा तत्रेहृतो भावो पंकजग्रहणे त्वया ॥
एतावदुत्कापुष्पाणि निमज्यादाय पदे पदे ॥ प्रस्थितो नगरं पुण्यं नाम्ना वाराणसीं शुभां ॥ तत्र विक्रि
यतस्तानि नैव ग्राहाति कश्चन ॥ ततो दुःखमवाप्त्वा स्तस्मिन्विध्यांगणे स्थितः ॥ तत्र स्थानाह वसतः
श्रुतो वादित्रनिस्वनः ॥ कस्मिन्संभ्रमे ते घोषितो दिव्यवादित्रनिस्वनः ॥ जनानूचुः ॥ कांत्रिराजस्तु विख्या
तो वंद्रद्युम्नस्तु पार्थिवः ॥ तस्यास्ति दुहिताख्याता नाम्ना चंद्रवती शुभा ॥ उपोषिता तया चास्ति जयंती

चाष्टमी शुभा ॥ तत्र गच्छ जनाः सर्वे सुव्रतायत्र तिष्ठति ॥ एतच्छ्रुत्वा तु तत्र त्वं गतवानसि पार्थिव ॥ सा त्वया
॥ ५ ॥ नृपदृष्टा वै कृता पूजा हरेः शुभा ॥ ओं [illegible] यत्र पूजितो भगवान्हरिः ॥ कृतावितानं तत्र शोभा तु पुष्पैश्च
न्यैरलंकृतः ॥ पुष्पमंडपमध्ये तु दिव्या वेदी मनोरमा ॥ तस्योपरिष्टाद्वर्णैस्तु सर्वतोभद्रमुत्तमं ॥ तन्मध्ये
स्वर्णकलशं स्थापितं दृष्टवानसि ॥ तस्योपरि स्वर्णपात्रे क्षीरोदार्णव मंडिते ॥ स्थापितं देवकीसूनुं नव
रत्नविभूषितं ॥ देवक्या सहितं स्वर्णमयं सर्वार्थसाधकं ॥ पूजितं विविधैर्भोगैरुपचारैर्मनोरमैः ॥ पताका
तोरणाद्यैश्च मंडिते पुष्पमंडपे ॥ तं दृष्ट्वा भक्तिरुत्पन्ना तव तत्र नृपोत्तम ॥ पंकजैस्तैः कृता पूजा रचितः पु
ष्पमंडपः ॥ त्वया भक्त्याति भावेन पूजितं जगतां पतिं ॥ उपोषणं च तत्रैव कृतं जागरणं शुभं ॥ तं दृष्ट्वा वि
स्मितास्तत्र केनेहाभ्यर्चना कृता ॥ तावत्त्वां ददृशो साधवः स्थितं तत्रैव भूमिप ॥ ततस्तु प्रसादतो लुब्ध्यं बहु वित्तं यथेप्सि
तं ॥ न गृहीतं त्वया वित्तं भोजनेनानुमोदितः ॥ नभुक्तं भोजनं तत्र नच वित्तं गृहीतवान् ॥ स्वपाचविधियुक्ते
न पूजितः परमेश्वरः ॥ तदेतत्सुकृतं पूर्वजन्मन्येवार्जितं त्वया ॥ तत्प्रसादेन चैतत्तु विमानमधिरोहसि ॥
सप्तद्वीपभुवो राज्यं करोषि हतकंटकं ॥ गतच्छ्रुत्वा विस्मितो राजा न्यपृष्टुमुपचक्रमे ॥ हरिश्चंद्र उवाच ॥ ॥ ५ ॥

भगवन्केन विधिनास्मिन्मासे च का तिथिः ॥ कर्तव्या तन्ममाचक्ष्व यच्चानुग्राह्योस्ति ते यदि ॥ सनत्कुमार उवाच ॥
शृणुष्वावहितो राजन्कथ्यमानेन ते मया ॥ श्रावणस्य तु मासस्य कृष्णाष्टम्यां नराधिप ॥ रोहिणी यदि लभ्ये
तज्जयंती नाम सा तिथिः ॥ चंद्रोदये मध्यरात्रे याष्टमी रोहिणी युता ॥ तत्रार्चितो हृषीकेशो भुक्तिमुक्तिप्र
दो भवेत् ॥ परा वा यदि वा पूर्वा सैवोपोष्या महाफला ॥ दिनद्वये मध्यरात्रेष्टमी रोहिणी युता ॥ तिथ्यर्क्ष
योर्निर्णयेतु यदि योगो न लभ्यते ॥ तदाहो रात्रमध्येपि कुलयोग प्रशस्यते ॥ अष्टमी घटिकामात्रा यदि
स्याद्रोहिणीयुता ॥ परतो नवमी सोमबुधवारेण वा भवेत् ॥ तिथ्यर्क्षवारयोगोयं कदाचिदपि लभ्यते ॥
तत्र कोटिगुणं पुण्यं लभ्यते वोपवासतः ॥ नाष्टमी रोहिणी योगो मुहूर्तमपि लभ्यते ॥ प्रतिवर्षेपि कर्त
व्या पूर्वा वा यदि वा परा ॥ चंद्रोदये निशीथे तु सैव जन्माष्टमी स्मृता ॥ उपोष्या सा प्रयत्नेन न नक्षत्रमुपो
षयेत् ॥ जन्माष्टमी केवला स्यात् नक्षत्रजयंतिका ॥ बुधसोमयुतापि का फलदा पुण्यवर्धना ॥ विधानं
तत्र वक्ष्यामि यत्कृत्वा न पुनर्भवेत् ॥ उषोदितस्तु तत्रान्हि स्नातः कृष्णतिलैः सह ॥ स्थापयेद्व्रणकुंभं
नवरत्नसमन्वितं ॥ तस्योपरि न्यसेत्पात्रं सौवर्णं लक्षणान्वितं ॥ तत्र पीतस्तनं साक्षाद्देवक्यासहितं हरिं ॥

॥७॥ वित्तशाठ्यंनकुर्वीतयथावित्तंतथाफलं॥ तद्वच्चरोहिणीकार्यासौवर्णाराजतःशशी॥ अष्टांगुलःशशी
प्रोक्तोरोहिणीचतुरंगुला॥ कर्णयोःकुंडलेदद्यात्कंठाभरणकंकृणे॥ एवंकृत्वातुगोविंदंमन्वासह
जगत्पतिं॥ उपचारैःषोडशभिर्गीतवादित्रनिस्वनैः॥ महामहोत्सवेदेवंमंत्रैःपौराणसंभवैः॥
पूजयेद्देवकीसूनुंकृष्णंगोकुलमंडितं॥ वासुदेवश्चनंदश्चयशोदारोहिणीतथा॥ बलभद्रश्चगोपा
लास्तत्रकार्यामनोरमाः॥ बालक्रीडादिसकलंकृष्णस्यैवविचेष्टितं॥ पूतनाशकटंकेशीवत्सधेनुकयो
र्वधः॥ यमुनाचक्रदंबश्चतथैवयमलार्जुनौ॥ कंसःशिलायोगमायापाससर्वमेतत्तुकारयेत्॥ पूजयेद्यो
यथाशक्त्याकृष्णंतन्मयसंस्थितं॥ आचार्यस्योपदेशेनयथाविभवसारतः॥ ततोगुरूंश्चविप्रांश्च
सर्वरत्नवरादिभिः॥ भूमिगोश्वादिदानैश्चकृष्णश्चप्रियतामिति॥ यथाप्रसूतिकायाश्चलोकेक्रियतसर्व
उत्सवः॥ गीतवादित्रनिर्घोषैःशेषांतुरजनींनयेत्॥ प्रातःस्नातःशुचिर्भूत्वाकृत्वासर्वाह्निकक्रियाः॥
पूर्वोक्तविधिनापूज्यंसंप्रार्थ्यमनसिस्थितं॥ इहपुत्रादिसकलंश्रेयःप्राप्नोत्यसंशयः॥ एवंचतेनते ॥७॥
राजन्सर्वंप्राप्नोत्यसंशयं॥ किमन्यच्छ्रोतुकामस्त्वंनोचेद्गच्छयथासुखं॥ सूतउवाच॥ इतिश्रुत्वा

हरिश्चंद्रः प्रणम्यब्रह्मणः सुतं॥ प्रदक्षिणीकृत्यत्रयथौ चकारच्यवयपासुखंमहत्तं॥ जन्माष्टमीचगीतान्चतुलसी
सेवनात्तथा॥ सप्तजन्मार्जितैः पापैः मुच्यते नात्रसंशयः॥ सर्वमेतत्समाख्यातं किंभूयः श्रोतुमिच्छसि॥ ५७॥
इतिश्रीपद्मपुराणे हरिश्चंद्रोपाख्याने तृतीयोध्यायः॥ ३॥ शौनकउवाच॥ साधुसाधु कथा सूत कथि
तानुचयामम॥ गीतापाठसेवनं कीदृक् तुलसीसेवनं कथं॥ किंपुण्यं किंफलं जातं पूजासाध्वी हरीतयोः॥
तत्सर्वं शंसमे सूत कथां त्वेषां हि विस्तरात्॥ सूतउवाच॥ साधुपृष्टस्त्वयाद्विजश्रेष्ठ कथावैविष्णुवल्लभा॥ तांकथांतु
थयिष्यामि व्यासेनोक्तां शुभां मम॥ दृष्टास्पृष्टाथवाध्याता कीर्तितानमिताशुभा॥ रोपितासंचितानिसंपूजितातु
लसीशुभा॥ नवधातुलसीभक्तिं ये कुर्वंति दिने दिने॥ युगकोटिसहस्राणि निवसंति सुरालये॥ रोपितातुलसी
यावत्कुरुते मूलविस्तरं॥ तावद्युगसहस्राणि तनोति सुकृतं मुने॥ यावच्छाया प्रशाखाभिर्निजपुष्पफलैर्मुने॥
रोपिता तुलसी पुण्यं वर्धते वसुधातले॥ कुले तेषां तु ये जाता ये भविष्यंति ये गताः॥ आकल्पयुगसाहस्रं तेषां
वासो हरेर्गृहे॥ भूगतैस्तु तुलसीमूले मृत्तिका स्पर्शितायुता॥ तीर्थकोटिसमा ज्ञेया तुर्मा यत्नेन साग्रहे॥ तुल
सीमंत्रिका यत्र काष्ठं पत्रं च वेश्मनि॥ तिष्ठते मुनिशार्दूल न सपापैस्तु लिप्यते॥ तुलसीगंधमाघ्राय यत्रगच्छ

तिमारुतः॥ द्विजोदत्रासनंप्रतंपूतोयाम ध्रतुर्विधः॥ तुलसीधनगोविप्राश्च कुर्वीदुरिपूजनं॥ तस्यदूरगत
॥८॥ स्यापिनहरं वैष्णवंपदं॥ तुलसीमंजरी मुंड्रं ललाटेयस्यदृश्यते॥ देहिनस्यश्पते पापं क्षीयमाणंतुशौनक॥
शिरसिप्रक्षिपेयस्तु तुलसीमूलमृत्तिका॥ विघ्नास्तस्यविनश्यंतिसानुकूले ग्रहेभवेत्॥ यात्रीफलंतु तुलसी
मंत्रिकाहारकोद्भवा॥ सफलंजीवितंतस्यतत्तापंयस्यवेश्मनि॥ स्मृतिमात्राच्चयथागंगादर्शनादेवनर्मदा॥ घ्रा
णेनतुलसी पापं पूर्वजन्मार्जितंहरेत्॥ तुलसीमंत्रिवांबिभ्रद्यदिप्राणान्विमुंचति॥ यमोपिनक्षितुंशक्तो
युक्तं पापशतैरपि॥ येकुर्वंतिजनानित्यं तुलसीवनपालनं॥ तेस्वर्गस्तु स्वमाप्नोति जायतेविष्णुवल्लभः॥
शौनकउवाच॥ तुलसीपत्रमाहात्म्यंश्रोतुमिच्छामितत्वतः॥ कथंत्रिलोकनाथस्य सघः प्रीतिकरं भवेत्॥
सूतउवाच॥ शृणुतां द्विजशार्दूलहरिणाभाषितंपुरा॥ तुलसीपुण्यकथनं नारदायमहात्मने॥ शृणुब्रह्म
न्मुनेचित्रांतुलसीमहिमांपरां॥ वक्तुं कल्पशतेनापियेनकेनन शक्यते॥ तुलसीदलमाहात्म्यं शृणुप्र
यसमाहितः॥ तेनाधीतंश्रुतंतेन तेनसर्वमनुष्ठितं॥ वृंदावनंस्य कुरुते तुलसीभक्तिसंयुतः॥ अथवाक
स्येदत्तोस्तस्मैनिगदितः शृणु॥ तुलसीस्थापनंसंकल्प्यविन्यसेदेवमानवः॥ जन्मत्रयार्जितैःपापैस्तत्क्षणा ॥८॥

देवमुच्यते ॥ यो नरस्तुलसीसंस्थं साम्यकुसं स्थाप्य वर्धयेत् ॥ सस्सप्त कुलसंयुक्तो विष्णुसायुज्यमाप्नुया

त् ॥ तुलसीपत्रसंयुक्तं जलं शिरसि यो वहेत् ॥ तस्य स्यात्सफलं जन्म तमेनि गदितः श्रृणु ॥ गंगादि सर्वतीर्थे

र्थेषु स्नात्वा यत्फलमश्नुते ॥ तत्फलं समवाप्नोति मधुसूदनशासनात् ॥ कुर्यात्तुलसीकाष्ठ धारयेद्द्विज

सत्तम ॥ स तु ब्रह्मपुरं प्राप्य मोदते ब्रह्मवच्चिरं ॥ तुलसीकाननं दृष्ट्वा यो नमेच्छिरसानतः ॥ जन्मकृत्पार्जि

तं पापं विधूय स्वर्गमाप्नुयात् ॥ तुलसीकाननस्याग्रे दीपदानं करोति यः ॥ द्वादशादित्यसंकाशे विमा

ने दिवि मोदते ॥ पारेणालंकृतं दिव्यं तुलसीकाननं नरः ॥ यं दृष्ट्वा मोदते विष्णोः सालोक्यं प्राप्यते द्वि

जः ॥ महापातकयुक्तोपि तुलसीपत्रभक्षणात् ॥ साधुरेव विशुद्धात्मा जायते नात्र संशयः ॥ तुलसीद

लसंमिश्रमुदकं प्राशयेद्यदि ॥ स कुलत्रयसंयुक्तो विष्णोः सायुज्यमाप्नुयात् ॥ तुलसीकाननाधे तु प्रा

सादं यस्तु कारयेत् ॥ कंटकावरणं वापि तन्मे निगदितः श्रृणु ॥ यावद्दिनानि तावत्तु तिष्ठत्यस्य कृतं भुवि ॥

तावद्युगसहस्राणि ब्रह्मलोके महीयते ॥ तुलसीमूलजातानि सेकाहेतृणानि च ॥ ब्रह्मलोकतृणानि यः ॥ तस्या

र्जितानि पापानि हंति तेयमः स्वयं ॥ एकं कुंभोदकं वापि प्रोक्ष्य तुलसीवने ॥ तस्यैव पितरः सर्वे सानंदाः स्व

॥७॥ र्गमाप्नुयुः॥३॥ इत्येतत्कथितं सर्वं नारदाय महात्मने॥ नवधा तुलसीभक्तिः कथिता तु मयाधुना॥३८॥ इति श्री
पद्मपुराणे हरिचंद्रोपाख्याने चतुर्थोऽध्यायः॥४॥ आनंदबोधयित्री च हानंदानंदवाटिका॥ याचैव गीय
ते श्रीभोवाङ्गनी शाश्वती तनुः॥ यां स्मरन्सर्वपापेभ्यो मुक्तो विष्णुपदं ययुः॥ तां कथां कथयिष्यामि श्रोतुमर
र्हसि श्रीनक॥ कदाचिदासने रम्ये सुखासीनं मुरुद्विषं॥ आनंदयित्री लोकानां लक्ष्मीः पप्रच्छ सादरं॥ लक्ष्म्यु
वाच॥ शयानुरसि दुग्धाब्धौ भगवन्केन हेतुना॥ उदासीन इवैश्वर्ये भासस्ये जगतां पते॥ इति देव्या वचः
श्रुत्वा मुरारी नामाभिगर्जितः॥ उवाच श्लक्ष्णया वाचा विस्मयोत्फुल्ललोचनः॥ श्रीभगवानुवाच॥ नाहं सुमुखि
निद्रालुर्निजं माहेश्वरं महः॥ दृशा तत्त्वानुवर्तिन्या पश्याम्यंतर्निमग्नया॥ तं देवमजरं ज्योतिरात्मरूपमनामयं॥
नयेन रहितं किंचिज्जगत्त्रय चराचरं॥ निर्मथ्य बुद्धिपाथोधिं वेदशास्त्राम्बुधिं सुधीः॥ द्वैपायनस्तु भगवान्
नीतिशास्त्रं व्यजंभयत्॥ साचैव गीयते श्रीभोः शाश्वती तनुरीश्वरी॥ निद्रालुरिव दुग्धाब्धौ देवेशि प्रतिभा
ति मे॥ सूत उवाच॥ इति तस्य मुकुंदस्य गीतमानंदकं वचः॥ प्रहर्षोत्फुल्ललोलाक्षी लक्ष्मीस्मृत्वा दिशि स्म हे॥
लक्ष्मीरुवाच॥ भगवानेव हृषीकेश सदा ध्येयोसि योगिनां॥ तस्मात्त्वत्परं वान्यदिति कौतूहलं हि मे॥ चराच ॥७॥

राणां लोकानां हर्त्ता कर्त्ता स्वयं प्रभुः ॥ कस्त्वं च सर्वभूतेशस्तन्मां बोधय शंकर ॥ श्रीभगवानुवाच ॥ मामकम
मिदं देवि वपुर्मे मनताश्रितं ॥ सृष्टिस्थित्युपसंहारं क्रियाजालोपशोभितं ॥ कुतोन्यदात्मनो रूपं द्वैताद्वैतविव
र्जितं ॥ भावाभावविनिर्मुक्तं मनाद्यंत मयं प्रिये ॥ रूपमैश्वर्यमात्मैकगम्यं गीतासु कीर्तितं ॥ इत्थं वर्ण्य वचो
देवी देवस्यामिततेजसः ॥ श्रीकमानाह वाक्यानां परस्परविबोधिनां ॥ स्वप्रकाशात्ततु यस्य रूपं नामत्व कीदृशं ॥
इदं कथं विभेदेन बुध्यते भवभीरुभिः ॥ इति तस्या वचः श्रुत्वा इतिहासं पुरातनं ॥ माहात्म्यमितिहासं च सर्वं
तस्यैन्यवेदयत् ॥ शृणु सुश्रोणि वक्ष्यामि गीतासु स्थितिमात्मनः ॥ वक्त्राणि पंच जानीहि पंचाध्यायीमनुक्रमा
त् ॥ दशाभूजास्तथा चैकमुदरं द्वे पदांबुजे ॥ एवमष्टादशाध्यायी वाङ्मयी तनुरैश्वरी ॥ जानीहि ज्ञानमात्रेण
महापातकनाशिनी ॥ अत्राध्यायं तथार्द्धं वा श्लोकं श्लोकार्द्धमेव वा ॥ अभ्यस्यति सुमेधाश्च स याति परमां
गतिं ॥ लक्ष्मीरुवाच ॥ इतिहासकथां कांत श्रेयसां साधनं परं ॥ सर्वज्ञ सर्वचैतन्य सर्वेश्वर गिरां गुरो ॥ भव
सा स्तव्य देवस्य न तृप्तिर्मम जायते ॥ तिनैव श्रवणोत्कंठा वर्द्धते गरुडध्वजे ॥ सप्तमष्टादशाध्यायं महिमानमु
दीरय ॥ गरुडध्वज उवाच ॥ पुण्यामष्टादशाध्यायीं कथयिष्यामि सुंदरि ॥ संसारयातनाजालविदारणप

॥१०॥

रायणं ॥ परं रहस्यं सिद्धानामविद्योन्मूलनक्षमं ॥ विवेकवल्लरीमूलं कामक्रोधमदापहं ॥ पुरंदरादिगीर्वाणचि
त्तविश्राममंदिरं ॥ सनकादिमहायोगीमनोरंजनकारकं ॥ नातः परतरं किंचिद्रहस्यं हंसगामिनी ॥ तापत्र
यापहारं च नानापातकनाशनं ॥ यथा गिरीणां कैलासो यथा चंद्रादिवौकसां ॥ तीर्थानां पुष्करं तीर्थे यथा लुब्धे
षु पंकजं ॥ पतिव्रतासु नारीषु यथा लोके अरुंधती ॥ यथा नक्षत्रवृंदेषु [illegible] चंदनः ॥ यथा रौद्रेषु
सर्वेषु वीरभद्रो महाबलः ॥ यथा व्यासो मुनींद्रेषु योगीषु त्रलविष्णुः ॥ यथा दानेषु सन्मानं नदीषु गोतमी
यथा ॥ यथा क्षेत्रेषु सर्वेषु प्रभासं कर्मभूमिषु ॥ तथा त्वत्पादनूपाध्यायमाहात्म्यं भुवनत्रये ॥ तस्याख्यानमि
दं पुण्यं भक्त्या वर्णयसुव्रते ॥ यस्याकर्णनमात्रेण नरः पापात्प्रमुच्यते ॥ अस्ति मेरुगिरेः शृंगे पुरी रम्यामम
रावती ॥ विश्वेश्वरविनोदाय निर्मिता विश्वकर्मणा ॥ निरंतरं त्रयस्त्रिंशत्कोटिनिर्वाणभास्कराः ॥ तेजः पुंज
वती साक्षात्फुल्लविपिनविभ्रता ॥ चिंतामणिशिलाबद्धप्रासादापत्रकामदा ॥ जयंतीपेरुत्रिभुवनानुत्तमसुख
पुरावधि ॥ यत्र कल्पद्रुमच्छायासु स्वासीनामहर्षयः ॥ शचीसमन्वितः साक्षाद्गीर्वाणगणसेवितः ॥ त
स्यां देवस्य कृपायामासीत्पूर्वं शतक्रतुः ॥ सदाचिरसुखासीनो विबुधदूतैरधिष्ठितः ॥ सहस्रनेत्र मायांतमन ॥१०॥

पश्यन्स्तु रूपं परं ॥ ततस्तदा यते जोभिरभिभूतः पुरंदरः ॥ मणिसिंहासनाच्चूर्णं पतितः स्वर्नमंडपे ॥ सिंहा
नं प्रपातस्य ततस्तस्य हरेर्भटैः ॥ पुण्यतोयाभिषिक्तस्य महेंद्रस्य पुनर्मोजा ॥ वामांकुमारो हाश्रुं दिव्यदुं
दुभिनिस्वनः ॥ अथ यहत्रिमसंगीतं गीर्वाणाः प्रमुदान्विताः ॥ सुरानिराजया मास्सुर्दिव्यरत्नैः सुरस्त्रियः ॥ त
तो वेरूपयोदे वैरात्रिर्वादं ततो दधुः ॥ रंभाद्यानन्नृतुस्तस्य पुरस्तादप्सरोगणाः ॥ गंधर्वा ललिताल्लापा जगुर्मं
गलकौतुकानु ॥ एवं हृते तेन मिंद्रं तु दृष्टुं बकुभिरुत्सवैः ॥ विना कतु शतं दृष्ट्वा शक्रो विस्मयमागतः ॥ न प्रपा
वि हि तामार्गे नतडागा विनिर्मिताः ॥ नरोपिता महावृक्षाः पांथश्रमनिवारकाः ॥ न प्रदेशे पूजितो वै देवः पा
र्वतीवल्लभः ॥ निधिवासे स्थितादेवी पूजिता न महालसा ॥ गोतमी तीरमाश्रित्य विष्णुर्नैवावलोकितः ॥
नहृतं त्रि रजेस्नानं नैकाम्रीपुरं गतः ॥ नार्मदं कुपुरख्याते नागनाथो निरीक्षितः ॥ न कुंगमप्राती रस्थो
दृष्टो हरिहरेश्वरो ॥ कावेरीवर्णि कातीरे श्रीरंगो नैव वीक्षितः ॥ दीनास्तु नाथाः केशरं कारागारान्न मो
चिताः ॥ न तीर्थे पुष्करे तस्मिन्मतिथिर्नैव तोषितः ॥ न पुष्करिण्यो विहिता मध्येमार्गे बहूदकाः ॥ न प्रासादाः कृ
ताः कापि न्न लिविष्णु पिनाकिनो ॥ न कृताश्चिन्दु पाक्रांता रक्षिताः शरणं गताः ॥ कथं वै कर्मणा केन देवदन्तमिहा
र्जितं ॥ इति चिंताकुलो भूत्वा हरिंद्रः दृष्टुं पुरंदरः ॥ पयो वै सहसा खिन्नः क्षीराकूपारमंदिरं ॥ तत्र प्रविश्य गोविं

॥११॥ ऽकथयामासदेवराट्॥ अकस्माद्विजसाम्राज्यंभ्रंशाद्दुःखेनदुःखितः॥ इंद्रउवाच॥ व्रतेनधर्मोविहितोनतेनक्रतवः
कृताः॥ ममासिंहासनंदिव्यंकथमाक्रांतमच्युत॥ सूतउवाच॥ इत्येतंवदतस्तस्यशक्रस्याथांबरमापतिः॥ उन्मीलि
तस्मितास्योसौप्रत्युवाचमधुरंवचः॥ श्रीभगवानुवाच॥ किंदानैरप्यग्निलोके किंतपोभिःकिमध्वरैः॥ सेव्यमानैःक्षितित
लेसेव्यःप्रीणितवान्पुरा॥ इंद्रउवाच॥ भगवन्कर्मणाकेनतुष्टोसित्वंवृषप्रभो॥ यत्प्रीत्याभगवान्प्राप्तस्तस्मैपौरंदरं
पदं॥ श्रीभगवानुवाच॥ जपत्सप्ताष्टादशाध्यायिगीताप्रथमाश्लोकपंचकं॥ तेनपुण्येनसंप्राप्तंतवसाम्राज्यमुत्तमं॥
इतिविष्णोर्वचःश्रुत्वाज्ञात्वोपायंपुरंदरः॥ विप्रवेषधरोभूत्वागतोगोदावरीतटे॥ तत्रापश्यत्पुरंपुण्यंकालि
काग्राममुत्तमं॥ यत्रकालेश्वरोदेवोवर्ततेकालमर्दनः॥ तत्रगोदावरीतीरेस्थितंपरमधार्मिकं॥ अपश्यत्करुणा
वंतंब्राह्मणंवेदपारगं॥ गीतामष्टादशाध्यायींजपंतंनित्यमादरात्॥ ततस्तच्चरणद्वंद्वेलुठित्वापश्यामुदा॥
गीतामष्टादशाध्यायींप्रजपस्त्वयमादरात्॥ अतएवपरंतत्त्वमुनीनामिदमुत्तमं॥ नतत्पुण्येनतेनासौवि
ष्णोःसायुज्यमाप्तवान्॥ हित्वापुरंदरादीनांदेवानांपदमल्पकं॥ गीतामष्टादशाध्यायीमहात्म्यंकथितंमया॥
यस्यस्मरणमात्रेणसर्वपापैःप्रमुच्यते॥ ५५॥ इतिश्रीपद्मपुराणेहरिश्चंद्रोपाख्यानेपंचमोध्यायः॥ ५॥ ॥११॥

शौनक उवाच ॥ ततः किमभवत्सूत तस्मिन्मुनिवराश्रमे ॥ किमकारि ततो राजा मुनिः किं सूत वा स्तदा ॥ [illegible] सूत त्व
येत्वं पृच्छतः सत्वरं हितं ॥ शृण्वतस्तव वाक्यानि नास्ति तृप्तिर्महामते ॥ सूत उवाच ॥ एतस्मिन्नंतरे तत्र हरिश्चं
द्रो महीपतिः ॥ सुश्राव शब्दमसकृत्तरुणा या हि योषितः ॥ त्रायत्राताः स्त्रियः काश्चित्सर्वाः संप्रार्थ्य रोद
नात् ॥ स धनुः सह सोहाय मा भैरित्यभिभाषत ॥ मयि शासति दुर्बुद्धिः कोत्रान्यायं प्रवृत्तिमान् ॥ नंकोदि
वानुसारी च सर्वारंभविघातकृत् ॥ एतस्मिन्नंतरे रौद्रो विघ्नराट् समचिंतयत् ॥ विश्वामित्रोयमतुलं तप
रास्थाय वीर्यवान् ॥ प्रागसिद्धा भवादीनां विद्याः साधयते व्रती ॥ संध्या नाम क्षराणां च त्रियासं यमिनो मुनेः ॥
एता मया तीः क्रंदंति कथं कार्यमिदं मया ॥ तेजस्वी कौशिकः श्रेष्ठो वयमम घसुदुर्बलाः ॥ क्षुब्धां सेतास्तथा भी
ताः पारं प्रतिभाति मे ॥ अत्र चायं नृपः प्राप्तो मा भैरित्येवादमुत् ॥ इदमेव प्रविश्याशु साधयिष्ये य
दीप्सितं ॥ इति संचिंत्य रौद्रेण विघ्नराजेन वै ततः ॥ आविवेश नृपं ब्रह्मन्विघ्नस्तस्मान्नचायया ॥ तेना
विष्टो नृपः क्रोधादिदं वचनमब्रवीत् ॥ कोयं बध्नाति वस्त्रांते पावकं पापकृन्नरः ॥ बलोत्कृततेजसा दीप्ते मा
यि पत्याबुपस्थिते ॥ सोयं मत्कार्मुकोत्सृष्टैः विदीपितदिगंतरैः ॥ शरैर्निर्भिन्नसर्वांगो दीर्घनिद्रामपेक्षते ॥

॥१२॥ विश्वामित्रस्ततः क्रुद्धः स्मृत्वा नरपतेर्वचः ॥ स्थिते मुनिवरे तस्मिन्ने क्षुर्विघाक्षणेन तां ॥ राजा चागत्य तं दृष्ट्वा विश्वा
मित्रं स्वस्थितं ॥ भीतः प्रावेपनात्यर्थं सह साम्बु क्ष्पर्णवत् ॥ निपत्य दंडवद्भूमौ प्रणाममकरोत्ततः ॥ स राजा
नं ततो वाक्यं मुनिस्तिष्ठेति चाब्रवीत् ॥ कस्मात्क्रूरा विदू तत्त्व माक्षेपनं तिक्रोपतः ॥ आश्रमोपगतः क्रोधी ममायं
सर्वदा शुचिः ॥ ग्रामाद्दूनात्तथा राष्ट्रादेकतां गर्जसिंह योः ॥ भीतः प्रावेपता त्यर्थं सह साम्बु क्ष्पर्णवत् ॥ नि
पत्यानंतरं प्राप्तः क्रोधो मह्यं न विद्यते ॥ कथं ममाश्रमे तिष्ठन् त्यक्त्वा धर्मं सनातनं ॥ अकारणेन चास्माकं कथं को
पत्रयुक्तवान् ॥ ततः स राजा विनयात्प्रणिपत्याभ्यभाषत ॥ राजोवाच ॥ भगवन्नेष मे धर्मो नापराधो मम प्र
भो ॥ न क्रोद्धुमर्हसि प्रभो मुने निजधर्मरतस्य मे ॥ दातव्यं रक्षितव्यं च धर्मज्ञेन महीक्षिता ॥ चापमुद्यम्य यो
द्धव्यं धर्मशास्त्रानुसारतः ॥ विश्वामित्र उवाच ॥ दातव्यं कस्य केरक्ष्या के योद्धव्यं च पार्थिव ॥ क्षिप्रमेतन्ममाख्य
पद्य धर्मभयं तव ॥ राजोवाच ॥ दातव्यं विप्रमुख्येभ्यो ये चान्ये कृशवृत्तयः ॥ रक्ष्या भीतास्सदा युद्धं कर्तव्यं परि
पंथिभिः ॥ विश्वामित्र उवाच ॥ अदाता कुप्रभुः स्वामी क्रोधलोभसमन्वितः ॥ ममाद्य नृपिते दातुं शक्तिर्नास्ति
नृपाधम ॥ राजोवाच ॥ दक्षिणां संप्रदास्यामि भवतो मुनिसत्तम ॥ उच्यतां भगवन् यत्ते दातव्यमविशंकितं ॥ ॥१२॥

दत्तमि सेवतस्कि प्रयच्छपिस्या स्वकुले मे ॥ विश्वामित्र उवाच ॥ यदि राजा भवान्सम्यक् राजधर्ममवेक्षसे ॥ संयच्छ
कर्मो विप्रोहं दातामिष्टदक्षिणां ॥ सूत उवाच ॥ एतद्राजा वचः श्रुत्वा प्रहृष्टेनांतरात्मना ॥ पुनर्जातमिवात्मा
नं मेने प्राह च कौशिकं ॥ राजोवाच ॥ हिरण्यं वास्तु वर्णं वा पत्नीं पुत्रं कलेवरं ॥ प्राणान् राज्यं पुरं लक्ष्मीं यदभिप्रेत
मात्मनः ॥ वृः कृतार्थोहि भगवन् कस्य किं वा प्रदीयतां ॥ विश्वामित्र उवाच ॥ राजन्यदि गृहीतोहं यस्त्वया कः
प्रतिग्रहः ॥ प्रयच्छ प्रथमं तावद् दक्षिणां राजसूयकीं ॥ राजोवाच ॥ धन्योस्म्यनुगृहीतोस्मि यद्भवान् तदुदस्व
मे ॥ गृह्णातु हि भवान्यल्लब्धं मे जन्मतः फलं ॥ सूत उवाच ॥ ततो भृंगारमादाय मणिकांचननिर्मितं ॥ दध्य
क्षतसमायुक्तं परिपूज्य यथाविधि ॥ हिरण्यगर्भेति तदा मंत्रं वै समुदीरयन् ॥ अग्निपवस्त्वेति तथा स्वस्ति
पश्चात्तथाकरोत् ॥ ततो राजा मुनिश्रेष्ठं प्रहृष्टेनांतरात्मना ॥ पुनर्जातमिवात्मानं मेने सन्मपसत्तम ॥ राजोवा
च ॥ ब्रह्मन्नन्यदपि किंचिद्धि यन्मे मनसि वर्तते ॥ प्रापतां मुनिशार्दूल यस्त्वेष्टः परिग्रहः ॥ विश्वामित्र उवाच ॥
स्वधर्मो दत्त्रितो राजन्दातृत्वं परमं तव ॥ तस्मात्त्वं प्रोक्तं प्रागेव तत्तदातुमिहार्हसि ॥ ससागरवनोपेतं यद
न्नग्रामपत्तनं ॥ राज्यं च सकलं वीर रथाश्वगजसंकुलं ॥ कोशागारं च कोशाक्ष यच्चान्यद्विद्यते तव ॥ विनाभार्यं

॥१३॥ वपुत्रंचशरीरंचतथानघ॥ यच्चमेसर्वधर्मस्तुसोयंत्वामनुगच्छति॥ बहुनावाक्किमुक्तेनसर्वमेतत्तवार्पितं॥ प्रह
ष्टेनैवमनसासोपिविकारमुखोन्नृपः॥ मुनेस्तद्वचनंश्रुत्वातथेत्युक्त्वाकृतांजलिः॥ विश्वामित्रउवाच॥ सर्वस्वय
दिमेदत्तंराज्यंनुवरबलंधनं॥ प्रभुत्वंकस्यराजर्षेराज्यस्थस्यतापसेमपि॥ हरिश्चंद्रउवाच॥ यस्मिन्नेवतुमे
लितुदत्तराजन्वतीमही॥ तस्मिन्नेदेवप्रभुस्त्वानीकिमन्यस्यरसेधनं॥ विश्वामित्रउवाच॥ यदिनाज्ञाप्रति
हताममराजवरस्त्वया॥ यत्रमेविषयेस्वाम्यंतस्मान्निक्रांतुमर्हसि॥ इत्युक्तोराजातदावाक्यंवज्रपातोपमंमुनेः॥
मुहूर्त्तमगमन्मोहंहरिश्चंद्रोमहीपतिः॥ मुहूर्त्तंप्राप्यसंज्ञांतुब्रह्मशापभयातुरः॥ ज्ञात्वावाविशिष्ठंजलगं
चिंताविष्टोबभूवह॥ श्रोणिसूत्रादिसकलंमुक्ताभूषणसंग्रहं॥ वृजवल्कलमध्यास्यसहपत्न्यासुतेनच॥
पत्नीउवाच॥ किंभोराज्येनराजेंद्रकिंभोगैजरविवितेनवा॥ सत्यमेवपुरस्कृत्वामाराजन्क्षोभमाविशः॥ सत्ये
नवायुर्वहतिसत्येनचहुताशनः॥ सत्येनार्कःप्रतपतिसत्येतिष्ठतिसागरः॥ सत्येनोर्ज्जंभिताभूमिःसत्येदे
वाःप्रतिष्ठिताः॥ पुरादानंवयद्दत्तंस्वाध्यायाध्यपनंव्रतं॥ तेनतेसुकृतेनाद्यमुक्तिःसिद्धाराजन्भविष्यति॥ सूतउ ॥१३॥
वाच॥ तथेतिचोक्त्वाहरिश्चंद्रराजागंतुंप्रचक्रमे॥ स्वपत्न्यासोतयासार्द्धंबालकेनात्मजेनच॥ व्रजंतंचततोद्वा

नं स मुनिः प्रत्यभाषत॥ विश्वामित्र उवाच॥ कृपास्वसि न दत्ता मे दक्षिणा राजसूयकी॥ तां दत्स्व महाभाग ततो ग
च्छ यथासुखं॥ राजोवाच॥ भगवन्नूराज्यमेतत्ते दत्तं निःकंटकं॥ अवशिष्टमिदं ब्रह्मन् देहत्रयं मम॥ विश्वा
मित्र उवाच॥ तथापि खलु दातव्या दक्षिणा राजसूयकी॥ विशेषतो ब्राह्मणानां यद्दत्तं तत्प्रतिश्रुतं॥ यावत्तो
षो राजसूये ब्राह्मणानां भवेन्नृप॥ तावदेव हि दातव्या दक्षिणा राजसूयकी॥ प्रतिश्रुतं च दातव्यं योद्धव्यं चातता
यिभिः॥ रक्षितव्यात्वपासन्नास्त्वयैतत्वाकुप्रतिश्रुतं॥ सूत उवाच॥ मुकुटं रत्नचित्रांगं ब्रह्मसूत्रं च शोभनं॥
कुंडले रत्नचित्रे च कंकणे चान्यवेदपत्॥ श्रीवापाथ्यापि अलंकारं बालकस्य तथैव च॥ विश्वामित्र उवाच॥ पृथि
व्यां सागरांतायां रत्नालंकारपूर्वकं॥ मामकं विद्धि राजेंद्र मह्यमेव प्रयच्छसि॥ अन्यच्चोपार्जयित्वा यथा
लाभं मोचयान्नतात्र॥ इह लोके परत्रैव मेव सुखी भविष्यसि॥ राजोवाच॥ भगवन्न संपत्तं नास्ति दास्ये का
लक्रमेण ते॥ प्रसादं कुरु विप्रर्षे सुखं वमनुचिंतय॥ विश्वामित्र उवाच॥ किं प्रमाणो मया कालः प्रतीक्ष्यस्ते ज
नाधिप॥ अल्पकालं समाचक्ष्व सकाशामि नामतो यथा॥ राजोवाच॥ मासेन तव विप्रर्षे प्रदास्ये दक्षिणा
धनं॥ इदानीं नास्ति मे वित्तमनुज्ञां दातुमर्हसि॥ विश्वामित्र उवाच॥ गच्छ गच्छ नृपश्रेष्ठ स्वधर्ममनुपाल

॥१४॥ य॥ शिवश्चते ध्वा भवतु मा सं नृपरिपंथिनः॥ सूत उवाच॥ अनुज्ञातः स गच्छेति जगाम वसुधाधिपः॥ पद्भ्यां
सखेनगच्छंतमनुगच्छति तं प्रिया॥ निष्क्रांते नृपतौ विप्रो व्याहर्तुमुपचक्रमे॥ विश्वामित्र उवाच॥ भो भो राज
न्न गच्छ त्वं मेहि पार्थिव नंदन॥ दस्वान्यपि मदीयानि दत्वा गच्छ सुखी भव॥ दुःखात्कर्ण्य वचो राजा विमुच्य
वसनान्यपि॥ कुमारस्य च भार्याया दत्वा गंतुं प्रचक्रमे॥ तरुवल्कल माबध्य सह भार्या सुतेन च॥ तं स भा
र्यं मुनिर्दृष्ट्वा गच्छंतं पुनरब्रवीत्॥ विश्वामित्र उवाच॥ मद्दत्तमपि न ग्राह्यं त्वया कस्यापि वै धनं॥ ग्रामे नै
वमवेष्टव्यमास्थिपत्सं यतो मम॥ पृथिव्यां सागरांतायां नत्वं राजा त्रिशंकुज॥ आमान्त्रे भोजनं नंच्छ णां
भूषणाच्छादनादिकं॥ आज्ञा फलं किलैश्वर्यं राज्यसारमिहोच्यते॥ मदाज्ञां त्वं पुरस्कृत्य सदा राजानुकीर्तिमा॥
गच्छ गच्छ महाबाहो दक्षिणा मे विधीयतां॥ आदौ श्रीपुरं गच्छ पश्चात्स्वसकलं जनं॥ जनस्य सकलस्यापि
ममाज्ञापरिपालनं॥ मुहूर्तमपि सस्थित्वा त्यक्त्वा सर्वजनं हृतं॥ सूत उवाच॥ एवमुक्तस्ततो राजा जगाम न
गरं स्वकं॥ आहूय प्रभजना सर्वानुवाच सहृतांजलिः॥ राजोवाच॥ प्रसादात्हो मया राज्यं भवद्भिश्च हृतं मम॥
यावद्घननं कालं पालिताः पुत्रवन्मया॥ पुण्याह्नो च्चेषज्ञागं वि नाकिंचिन्मया चितं॥ मित्राणि प्रधुनास्त ॥१४॥

वैप्रणपादहतोमम॥ एवमुक्ताः प्रजाः सर्वा वाक्यमूचुः शुस्विस्मिताः॥ प्रजा ऊचुः॥ त्वमस्माकं पिता नाथ त्वं बंधुस्त्वं सुहृत्तु
नथा॥ गन्तास्त्वमस्तु भद्रं ते आज्ञापयन्नृपोत्तम॥ राजोवाच॥ यदि वोस्ति मयि प्रीतिः कर्त्तव्यं वा हितं मम॥ तन्ममाज्ञाप्रयथा
सर्वैः पालिता प्रतिपूजिता॥ कार्यो न बाधा प्रभृति विश्वामित्रस्य सर्वदा॥ एतदाकर्ण्य वचनं कर्त्तव्यं च प्रयत्नतः॥ सूत
उवाच॥ इत्युक्त्वा गंतुमारेभे सभार्यः सकुमारकः॥ पद्भ्यामनुचितो गंतुमनुगच्छति तं प्रिया॥ तं सभार्यं नृपश्रेष्ठं नि
र्यांतं सस्तुतं पुराद्॥ दृष्ट्वा प्रचुक्रुशुः पौरा राजवश्चैवानुकंपिनः॥ हा नाथ किं जहास्यस्मान्नित्यार्त्तिपरिपीडितान्॥ त्व
तु जीतसंतापाय था पितरि मातरि॥ त्वं धर्मतत्परो राजा दीनानुग्राहकस्तथा॥ नयास्मानपि राजर्षे यदि धर्ममम
वेक्षते॥ मुहूर्त्तं तिष्ठ राजेंद्र भवतो मुखपंकजं॥ पिबामो नेत्रभ्रमरैः कदा द्रक्ष्यामहे वयं॥ यस्य प्रयाते यस्य पुरो या
ति पृष्ठे च पार्थिवाः॥ तस्यानुयाति भार्येयं गृहीत्वा बालकं सुतं॥ यस्य भृत्याः प्रयातस्य यांत्यग्रे गजसंस्थिताः॥
स एव पद्भ्यां राजेंद्रो हरिश्चंद्रोपगच्छति॥ हा राजन्सुकुमारं ते सुभ्रुरम्यं समुन्नतं॥ पथि पांसुपरिक्लिन्नं मुखं की
दृक् भविष्यति॥ तिष्ठ तिष्ठ नृपश्रेष्ठ स्वधर्ममनुपालय॥ आनृशंस्यपरो धर्मः क्षत्रियाणां विशेषतः॥ किं दारैः
किं सुतैर्नाथ धनधान्यैरथापि वा॥ सर्वमेतत्परित्यज्य छायाभूता वयं तव॥ हा नाथ हा महाराज हा स्वामिन् हा नाथ किं जहा
सि नः॥ यत्र त्वं तत्र नु वयं तत्सुखं यत्र वै भवान्॥ इति पौरवचः श्रुत्वा राजा शोकपरिप्लुतः॥ अतिष्ठत तदा मार्गे तेषा

॥१२॥ मेवानुकंपया॥ हरिश्चंद्रमथोद्दिश्य सत्यकीर्तिं जनेश्वरं॥ दुःखसूनो कामुकलेमंत्री विउलापाकुलेंद्रियः॥ अहोस्तु चंचला
लक्ष्मी नेचिरं तिष्ठते क्वचिह॥ गजकर्णानुरेव पुनूराज्या तियाति च॥ ससद्वीपार्णवा पृथ्वीमिमां पालयिता प्रभुः॥ य
मा भ्रयति देवेंद्रः संग्रामेषु पलायनं॥ यस्यकामुकमुक्तानां शराणां नतपर्वणां॥ देवासुरसमूहेषु कस्तिष्ठति तत्त्वा
ग्रतः॥ अश्वानां हेषितरवैर्वारणानां च बृंहितं॥ शंखवानां च निनादैश्च पूर्यं सोपादिशोदशा॥ स राजा पृथिवीपालैः
पदातिः प्रस्थितो वनं॥ दृश्यते किं गजीविधिः शुभाशुभसमन्वितं॥ उच्छ्रितैश्चातपत्रैश्च समं तालस्सारिभिर्जनैः॥
संस्तूयते च यो नित्यं सूतमागधबंदिभिः॥ त्रिशंकुसूनुरेकाकी स्मिातेगहनं वनं॥ तमालैः सरलैस्तालैर्लता
जीर्णद्रुमान्वितैर्धः॥ रौद्रं विहंगसंजूषं भल्लुस्वननिनादितं॥ शिवारावसमायुक्तं सुघोरं निर्जनं वनं॥ जपेश्चनिय
मे होमेस्तपोमंत्रसमन्विते॥ इदानीं कंटकैस्तीक्ष्णैः कथं यास्यति भूमिपः॥ सर्वलक्षणसंपन्ना सौम्या स्त्रीले
गुणान्विता॥ ओरस्त्री नरी कथं यातिदुःखेन महता वृता॥ इक्ष्वाकुवंशप्रभवः पद्मपत्रायतेक्षणः॥ रोहिताश्वः
कथं यास्यत्यप्रियोगर्भद्रवापरः॥ पंचवक्त्र[illegible]गंभीरस्त्रिविस्तीर्णः षडुन्नतः॥ सिंहस्कंधो तिबाहुश्च चक्रवर्ती
गुणान्वितः॥ पदातिः कथमेषा पादगच्छते गहनं वनं॥ धूलीधूसरसर्वांगः क्षुत्पिपासासमन्वितः॥१०६॥ इति श्री ॥१२॥
पद्मपुराणे हरिश्चंद्रोपाख्याने षष्ठोध्यायः॥६॥ सूत उवाच॥ विश्वामित्रोथ तं दृष्ट्वा पोरवाक्यामंत्रतो

मर्षो विवृत्ताक्षः समागम्य वचोब्रवीत् ॥ धिक् त्वां दुष्टसमाचार मन्दतेजं घृणार्दितं ॥ मम पूर्वं प्रदत्तां तु पुनश्चाद्य ए-
मिच्छसि ॥ इत्युक्तः परुषं तेन गच्छामीति सवेपथुः ॥ ब्रुवन्नेव ययौ क्षिप्रं मा क्रुधद् यितां करेः ॥ कौशिकस्तस्य तां भार्यां
सुकुमारां श्रमान्वितां ॥ दंडकाष्ठेन सहसा ताडयामास कौशिकः ॥ पथितां ताडितां दृष्ट्वा हरिश्चंद्रो नरेश्वरः ॥ ग
च्छमी साह दुःखार्त्तो नान्यत्किंचिदुवाचेह ॥ अथ विश्वेतदा देवाः पंच प्राह हृपालवः ॥ विश्वामित्रस्त्वपापो यं कान्ते
का स्ममवाप्स्यति ॥ येनायं यज्विनां श्रेष्ठः स्वराज्याद् व्यरोपितः ॥ अस्य चश्रद्धया दत्तं हुतं सोमं मखाध्वरे ॥ पीत्वा वयं प्र
यास्यामो मुदं मंत्रपुरःसरं ॥ इति तेषां वचः श्रुत्वा कौशिको तिरुषान्वितः ॥ शशाप तान् मनुष्यत्वं सर्वे यूयं समेष्यथ ॥
प्रसादितश्च तैः प्राह पुनरेव महामुनिः ॥ मानुष्यत्वेपि भवतां भवित्री नैव संततिः ॥ न दारसंग्रहश्चैव भवतां नैव म-
त्सरः ॥ कामक्रोधविहीनाश्च भविष्यथ सुराः पुनः ॥ ततो वतेरूर त्रोषे देवास्तो कुरुवेश्मनि ॥ द्रौपदी गर्भसंभूता पंच वै
पांडुनंदनाः ॥ एतस्मात्कारणात्पंच पंडवेयाम हारथाः ॥ न दारसंग्रहं प्राप्ताः शापात्तस्य महामुनेः ॥ एतत्ते सर्व
माख्यातं पांडवेय कथाश्रयं ॥ भीताप्रश्नश्चाश्चर्यं तेकिमन्यच्छ्रोतुमर्हसि ॥ १४ ॥ इति श्रीपद्मपुराणे हरिश्चंद्रोपा
ख्याने सप्तनोध्यायः ॥ ७ ॥ शौनक उवाच ॥ भवद्भिरेव कथितं कथाप्रश्नमनुक्रमं ॥ महत्कौतूहलं मेघ हरिश्चंद्र कथां
प्रति ॥ अहो महात्मना तेन प्राप्तं कष्टं महद्भुतं ॥ किं स्वित्सुखमनुप्राप्तं तादृगेव द्विजोत्तम ॥ सूत उवाच ॥ विश्वामित्रव

॥१५॥ चः भुक्त्वा स राजा प्रययौ शनैः ॥ त्रैधा स्वया वनुगतो भार्यया बालपुत्रया ॥ दिनमेकं ततो गत्वा राजा शोकसमन्वि-
तः ॥ उवाच वचनं पत्नीं समालोक्य सुदुःखितां ॥ क्व यास्यामो वरारोहे क्वाद्य रात्रौ वसतिर्मम ॥ क्व मे स्नेहान्वितो दे-
वि क्व मे दुःखेन दुःखितः ॥ शैब्योवाच ॥ सर्वे क्षयांता निचयाः पतनांताः समुच्छ्रयाः ॥ संयोगा विप्रयोगांताः मर-
णांतं हि जीवितं ॥ एतानि विद्धि तान्यत्र संसारेस्मिन्सुदारुणे ॥ नास्त्यंतदुःखिनः संति नास्त्यंतसुखिनः सदा ॥
अतएव हि विद्वांसस्त्यक्त्वाः सर्वपरिग्रहं ॥ निर्द्वंद्वा निरहंकारा मोक्षे कुर्वते मानसां ॥ वाराणसी निवसति नग-
री देवपूजिता ॥ न तस्मिन्विषये राज्ञा मानुषं द्रूपरिग्रहः ॥ तत्र साक्षान्महादेवः शूलपाणी महेश्वरः ॥ उमया
सहितः श्रीमान् क्रीडते पार्वतीपतिः ॥ तत्र गत्वा महाराज पुण्यापुण्यविचारणं ॥ कार्यमेतन्महाबाहो तत्र
यामो विशांपते ॥ सूत उवाच ॥ इत्याकर्ण्य वचः पत्न्या हरिश्चंद्रो महीपतिः ॥ जगाम सुदिनं पश्यां गिरिमध्ये
शनैः शनैः ॥ कंदमूलफलाहारप्रवरालोचितः स्रुतः ॥ पक्षमेकं वनं गत्वा मुनिना मायया कृतं ॥ अपश्यत महीपा-
लो ह्यरण्यं घोरदर्शनं ॥ निर्जलं जनहीनं च पायाश्रमविवर्जितं ॥ कुशकंटकपाषाणं प्रतप्तासि कृतान्वितं ॥
ददर्श तस्मिन्न चान्नं मरुमंडलसन्निभं ॥ मध्याह्नसमये राजा सपत्नीकः सबालकः ॥ क्षुधार्तश्च तृषार्तश्च ॥१५॥

नापश्यत्कुत्रचिज्जलं॥ नहारं नफलं तत्र नछायां नस्वमानुषं॥ प्रतस्तत्त्वस्वारारज्ञी क्षुत्तृषाव्याकुला भवत्॥ स
बाल: प्ररुरोदाथ तोयमन्नमयाचयत्॥ जलं पायय मे तात मातर्मे देहि भोजनं॥ सबालं व्याकुलां पत्नीं दृष्ट्वा
राजा रुरोद ह॥ मुहूर्तेन निपपाताथ मूर्छितो धरणीतले॥ राज्ञी च व्याकुला दीना सबाला तमुपाविशत्॥ क्षणेन
चेतनां प्राप्य प्ररुरोद लघुस्वरं॥ आदौ यांतु मम प्राणा यावज्जीवति मे सुतः॥ इयं च सुकुमारांगी यावज्जीव
ति सुंदरी॥ धिक्जीवितमहो कष्टं धिग्धिगित्यसरद्धे तत्॥ उत्थाय चागमन्मार्गे श्रान्तकैः सह भार्यया॥ बल
हीनः पथि क्षीणो ददर्शाग्रे सरोवरं॥ फलपुष्पद्रुमोपेतं स्निग्धपायं बहूदकं॥ तं प्रविश्य जलं पीत्वा कन्यायु
ग्ममपश्यत॥ चारुहास्यं चारुवक्त्रं चारुवक्रकुचोल्लकं॥ चारुसर्वांगमत्यर्थं सर्वालंकारभूषितं॥ कामाविष्टं
सहायिन्यौ रूपेणैव रतिश्रियौ॥ तमूचतुरुपागम्य इतएहीति सादरं॥ आवयोरतिथिश्लाघ्यो भुंक्ष्व भोगा
ननुत्तमान्॥ भार्यया सह राजेंद्र यथाकामं यथासुखं॥ आवामुद्वाह्यते भार्ये गांधर्वोद्वाहमागते॥ भविष्या
वस्व या राजन् द्वयोरपि मनोहृतं॥ ते वालोक्य हरिश्चंद्रो वाक्यमेनमुवाच ह॥ राजोवाच॥ भवंतौ कस्य कल्याण्यौ
कुतस्था नादिहागते॥ वसतश्चेह कस्माच्च भवती चेह कथ्यतां॥ कन्ये ऊचतुः॥ कुमार्यौ नृपतिश्रेष्ठ विश्वामित्र

॥१७॥ स्यभोमुनेः॥ आवांतस्य सुतेत्वेभे दुहितुर्वत्सलस्यहि॥ तस्या नृमा भम श्चास्ति तस्माद्दत्वा वयोः स्थितिः॥ राजो
वाच॥ जीवति पितरि कन्यायाः स्वैरं न कापि पथी र्त्तितं॥ वेदविद्भिर्मुनिश्रेष्ठैर्विनाहि वरणं तथा॥ प्रवृत्तिर्वरणे कस्मा
त्कृवती भ्यां स्वयंवृतं॥ विद्यमाने पि पितरि वरणं तदनुज्ञया॥ एवमुक्ते तु वचने सा कन्या पुष्प मभाषत॥ एकदा तु
नृपश्रेष्ठ क्रीडनेतस्य रैस्थिते॥ आज्ञापित्रावयो रे नोल्क नोपहरणे नृप॥ क्रीडनासक्त चित्ताभ्यां मालाभंगः
कृतस्तथा॥ शापात्तस्यापि चांडाल्यो संजाते नृप ते ॥ प्रसादितेन तेपार्श्वे माज्ञस्से चांसतांगते॥ भर्त्ता भवा
वयोर्नृप भुंक्ष्वराज्यं यथोचितं॥ आवयोर्यदि भर्त्ता त्वं भविष्यस्ये नयासह॥ तर्हि पृथ्वीं श्रियो पेतां तातस्ते सं
प्रदास्यति॥ राजोवाच॥ एवंविधेन राज्येन मम कार्यं न विद्यते॥ हा बाप्प लैव चांडाल्यो धिक् राज्यं धिक् च जी
वितं॥ कुमार्यूचतुः॥ येन केनाप्युपायेन राजा राज्यं समुद्धरेत्॥ यस्मा जेतु चितं राज्यं संप्राप्ति नरकं ध्रुवं॥ यत्न
ते पाल्यता कार्यं गुणप्रचुरता नृतं॥ राजोवाच॥ एकेनापि प्रणं संपति दोषेण बहवो गुणाः॥ पुतरा नचादुर्मती
नांस कलाः संपदो यथा॥ मद्यपे शुभ्वितानास्ति चौरे सत्यं तथैव च॥ हिंसके न शुभं कर्म कृतवे त्रितयं न हि॥ स्त्री
प्रसक्तस्य नो बुद्धिर्न श्रुतं न च पौरुषं॥ न स्थाति र्न सुखं लक्ष्मीर्लोको धर्मं कुतः कुलं॥ चांडाली गमने यस्या ॥१७॥

कुर्यात्सुहृद कामतः ॥ सनरो रौरवं गच्छेत्किं पुनः कामतो सुहृत् ॥ सूत उवाच ॥ एवमुक्त्वा समुनीश्वर राजा गंतुं प्र
क्रमे ॥ तावदेवाग्रतोपश्यद्विश्वामित्रमवस्थितं ॥ सभार्यस्तं मुनिं नत्वा कृतांजलिरुवाच ह ॥ राजोवाच ॥ किं नि
मित्तं मुने ब्रूहि तवागमनकारणं ॥ ब्रूहि कार्यं विधास्यामि यत्ते मनसि वर्त्तते ॥ ऋषिरुवाच ॥ भद्रं तेस्तु म
हाराज दीर्घायुर्विजयी भव ॥ तवाधुना मया दत्तं सकलं स्वकुलोचितं ॥ राज्यं गृहाण राजेंद्र पालयस्वाखि
लां महीं ॥ राजोवाच ॥ दानमेनं नृपस्योक्तं मुनिभिर्न प्रतिग्रहः ॥ दत्तं मयैव ते राज्यं ग्रहीतुं मे न शक्यते ॥
ऋषिरुवाच ॥ मम कन्याद्वयं चैतदुद्वाहय स्वपुरं नय ॥ प्रीत्यर्थं सकला पृथ्वी दत्ता ते सकला मया ॥ पारिब
र्हेण तुष्टं स्यात्कुरुष्व स्वाभिस्त्रिभिः सह ॥ ब्रुहि ते नृपशार्दूल मया पादं स्पृतां गते ॥ राजोवाच ॥ नोद्वाहामि मुनि
श्रेष्ठ प्रागेवोक्तं सहानयोः ॥ अंससंकरजं पापं कुतस्तं संमुनिसत्तम ॥ अन्यद्ब्रूहि करिष्यामि न वदस्वापरं वचः ॥
सूत उवाच ॥ एवमुक्तो मुनिस्तेन कोपादरुणलोचनः ॥ ललाटे भ्रुकुटीं कृत्वा प्राह प्रस्फुरिताधरः ॥ ऋषिरुवाच ॥
मम प्रतिश्रुतां तर्हि दक्षिणां राजसूयकीं ॥ प्रयच्छाधुना चेत्स्यच्छक्तिः मत्कोपवह्निजां ॥ राजोवाच ॥ स्वपे
नाद्यापि मासोयं पूर्णो नानतपोबल ॥ तिष्ठत्वपि च मासार्द्धं प्रदास्यामि प्रतिश्रुतं ॥ ऋषिरुवाच ॥ गच्छ गच्छ
नृपश्रेष्ठ नाद्य तावद्गतं चिरं ॥ स्वस्य स्वस्ति ते कुमारस्य भार्यायाश्च सदैव हि ॥ सूत उवाच ॥ एवमुक्त्वा मुनिश्रेष्ठे

॥१८॥ यातेराजासपुत्रकः ॥ जगामपश्यंदुःखार्तोसहपत्न्यासमाकुलः ॥ एवंप्रयातमालोक्य सप्तविंशतिमेहनि ॥ वि
श्वार्थमुनिनानेन आग्नेयी धारणा कृता ॥ विश्वामित्रेण दावाग्निः सृष्टो घोरो महावने ॥ प्रादुर्भूतस्ततः क्षिप्रं भ
गवान् हव्यवाहनः ॥ ज्वालामालामहाभीमो गंधनधूमसमन्वितः ॥ तृणगुल्मलतावृक्षा बहवो जज्वलुस्तदा ॥
ज्वालाभिर्गगनं व्याप्तं ज्वलनोल्काभिरेव च ॥ वायुनाभिहते वाग्नो ज्वलंतिव हविर्द्रुमाः ॥ आर्तनादान्मृगास्तत्र धा
वंति विहगास्तथा ॥ दावाग्निर्यंति दुःखंपाति सेवर्गं कुंजकैलते भूत्रा ॥ उर्ध्वं चैव दिशं याति पक्षिणस्त्रस्तचेतसः ॥ ऊर्ध्व
ज्वालावलीग्रस्ता पतंति हव्यवाहने ॥ अग्नेश्चटचटाशब्दो भैरवो लोमहर्षणः ॥ वायुना तरिता ज्वालाः समंतात्कान
नं ययुः ॥ धगधगिति वास्याभिहता ज्वाला भ्रमंति च ॥ क्वचित्केवलो धूमो विधूमः पावकः क्वचित् ॥ भयंकरो
हि भूतानां वायुनाग्निरिवोत्थितः ॥ तत्र छन्नमहीपालः सदावंसहसोत्थितः ॥ संत्रस्तहृदयो राज्ञी वाक्यं चेदमु
वाचह ॥ मार्गमावृत्य दावाग्निर्दारुणोयं सुदारुणः ॥ तिर्यकू व्रजाम इत्युक्त्वा प्रययौ दक्षिणां दिशं ॥ तत्रापि च गतस्त
द्वारी दावाग्निरुत्थितः ॥ अथ चोत्तरतस्तद्वत्पश्चात्तथैव समुत्थितः ॥ समंताद्वलयाकार वह्निना वेष्टितस्तदा ॥
अतिसन्निहितं वह्निं दृष्ट्वा राजा रुरोद ह ॥ अहो मे जीवितं कष्टं किंपापस्य दुरात्मनः ॥ राज्यभ्रष्टेन दुःखेन मया
वंशस्य क्षयः कृतः ॥ यद्बालहननात्पापं स्त्रीवधात्स्यात्पातनात्तु ॥ तौ चेव सबलानीह प्राणानि युगपन्मया ॥ सूर्य ॥१८॥

वंशोप्रसूतोयं कुमारं सुकुमारकं ॥ अग्निदाहसकसंप्राप्तो धिग्मामस्तु सुदुर्मतिं ॥ हा प्रिये हा शिशो वत्स ममानार्येण दु
र्यात् ॥ इमां कष्टां दशां प्राप्तो विश्वामित्रस्य कोपतः ॥ कुतस्तान्येव मित्राणि कुतो वा द्रव्यसंचयः ॥ रुणधारयमान
स्य सर्वं तिष्ठति वेश्मनि ॥ ब्रुवंति च महात्मानो धर्मशास्त्रविशारदाः ॥ क्षुद्वे धर्मप्रवृत्तस्य न भयं विघ्नते क्वचित् ॥
पत्नीं संरक्षयेद्यत्नात्पुण्यैनैव प्रपुज्यते ॥ दशमानां कथं पत्न्यै प्राणेभ्योपि गरीयसी ॥ न चास्मान महं शोचे न त्वां
बाल कंतथा ॥ तस्मात्तस्य मुनेर्लोपो दक्षिणायाः श्रुश्चिस्मितेः ॥ सूत उवाच ॥ दुर्लभं जीवितं ज्ञात्वा बालं च समवेक्ष्य
गतं तं ॥ पत्नी चम्पाकुलांदीनां वीक्ष्य वह्निमुपागते ॥ पत्न्युवाच ॥ न कश्चित्कस्यचित्को सुखदुःखोपपादने ॥
करोति सर्वमीशानो कर्ता हर्ता स्वयं प्रभुः ॥ ईश्वरः सर्वभूतानां प्रभवेद्विश्वतोमुखः ॥ मा विषादं महाभाग कु
रुष्वा रसुलोचन ॥ सामान्यमरणे राजन्नेत्वं शोचितुमर्हसि ॥ सूत उवाच ॥ अथ धूमेन सहसा वह्निना च तथा
नघा ॥ आवृता विकलाः सर्वे न प्रजानंति किंचन ॥ ज्वालाधूमसमायुक्तो दह्यमानः ततस्ततः ॥ कुतिष्ठामि कु
यास्यामि इति चिंताकुलो नृपः ॥ संतप्ता वह्निना तेन बालो रुरोदतिदारुणं ॥ तात नाल्पं तपान्तो हि मातर्मे शुष्यते
मुखं ॥ धूमेन नयने पूर्णे धाति किं चिन्न वीक्षितुं ॥ मां मां केमां गृहाण शुभ मां गोपादनं कुरु ॥ अथ उवाला हतं बालं

॥१७॥ दृष्ट्वा पत्नी च भूपतिः ॥ आकुलव्याकुलो जातो दह्यमानश्च वह्निना ॥ आक्रंदन्महाघोरं प्रगांत सदृशोपमं ॥ ब
हुधूमाग्निनाक्रांतं हरिश्चंद्रं महीपतिं ॥ रोहिताश्वं कुमारं च दृष्ट्वा शैव्याब्रवीद्वचः ॥ मा स्म त्वं त्यज राजेंद्र कुरु
धैर्यावलंबनं ॥ अन्यजन्मनि ब्रह्मस्वं देहि भूपापचेन्मतः ॥ दैवाध्ये जीवितं स्मजरजातं देहि प्रायदक्षि
णां ॥ इत्युक्त्वाथ पुनः प्राह धैर्यं स्त्वा महासती ॥ राजन्मे नास्ति वैधव्यं प्रविशेहं हुताशनं ॥ जीवन्तं तिष्ठसे याव
द्यं च मम बालकः ॥ न शक्नोमि विनिर्दग्धो पतितो समविक्षितुं ॥ आज्ञापय महाभाग प्रसादं कुरु मे प्रभो ॥ सूत
उवाच ॥ ततो राजा सुदुःखार्त्तो न किंचिद्वाक्यमब्रवीत् ॥ ततः पुनः पुनः पत्न्या प्रार्थितेन महाभुजा ॥ हस्तेना
ज्ञापिता धैर्यान्निराशो न स्वजीविते ॥ ततः साश्रूणि संमृज्य कृत्वा चास्य प्रदक्षिणं ॥ जानुभ्यामवनौ स्थित्वा
कृतांजलिपुटा सती ॥ पुरतो भूपतिं नत्वा वाक्यं चेदमथाब्रवीत् ॥ मया वै पूजितो देवो देवी च गिरिनंदिनी ॥ ब्राह्म
दत्तानि णेभ्यः प्रदत्तान्यां मिष्टान्नानि यदि भूरिशः ॥ पितृणां श्राद्धदानानि अतिथीनां च पूजनं ॥ भक्तिर्वै शुरयोश्चैव प्रा
ज्ञा तु भक्तिश्च निश्चला ॥ नान्यं च मनसा ज्ञातं तर्हि जन्मनि जन्मनि ॥ तेन पुण्येन महता हरिश्चंद्रस्तु भूपतिः ॥
सूत उवाच ॥ इत्युक्त्वा वचनं पत्नी दत्वा बालं नृपाय च ॥ गाढं परिवृतं कृत्वा प्रणम्य च दिवाकरं ॥ कृतांजलिपुटा ॥१७॥

नत्वानलमग्निं पुनरब्रवीत्॥ मनसा कर्मणा वाचा भर्त्राहं यदि पावक॥ अनुरक्तास्वकांतेन सत्यं तर्हि यमे कुरु॥
सूतउवाच॥ इत्युक्ते बलवान्वन्हिर्यत्रपत्रागमद्दुतं॥ ततो राज्ञी महीं दृष्ट्वा मूर्छितो निपपात ह॥ ततो सा बालः
सहसा गच्छ मातरं तु मातरं॥ दृष्ट्वाभ्यधावदं वै तिवदन्नसा विलेक्षण॥ क्व यास्यसि च मां त्यक्त्वा किं विहाने हो
न वै तन्व॥ हस्तेन वस्त्रमाकृष्य ज्वालां धूम्रमहतं त्रिशंकुं॥ दृष्ट्वा तमागतं माता प्रमत्त हर्षनिवर्तितः॥ दृष्ट्वा च वर
नेऽदह्यमानं स्वबालकं॥ पुनर्हुताशमागत्य प्राङ्कृत्य पतितानले॥ आज्याहुतिवसाक्षिप्तं प्रविवेश हुता
शनं॥ तस्यास्तेजो महारौद्रं द्वादशादित्यसन्निभं॥ दह्यमानस्तदा वन्हिरपयातः सती भयाद्ह॥ अथांतरि
क्षात्सहसा पुष्पवृष्टिः पपात ह॥ इंद्रादयः सुरगणाः साधु साध्वीत्यपूजयन्॥ निपत्य च तदा पादौ द्वावात्मा
नं भस्मसंचये॥ क्व गतोऽग्निरिति प्रोक्ता निर्गता सा तु रीतलात्॥ विस्मिता सा सती बालं गृहीत्वा पतिम
भ्यगात्॥ तां संप्राप्य ततो राजा दृष्ट्वा पत्नीं समागतां॥ पावकं च गतं दृष्ट्वा प्रोषितो विनतोऽब्रवीत्॥ गतो
यं पावकः क्वागतिं मत्वा त्वां भामिनी सती॥ त्वत्तुसाहाद्दग्धोन्ने विमुक्तो हव्यवाहनात्॥ गच्छाम स्तां पुरीं र
म्यां यत्रास्ते शंकरः स्वयं॥ इत्युक्त्वा तु हरिश्चंद्रो भूपतिः प्रययौ शनैः॥ आगतं पुरतस्तत्र विश्वामित्रमवस्थितं॥

दृष्ट्वा क्रोधसमायुक्तं विनयावनतोब्रवीत् ॥ प्रणम्य प्रांजलिः प्राह हरिश्चंद्रो महामुनिं ॥ राजोवाच ॥ नमस्ते मुनिशार्दू
ल किं कुरोमि तव स्वमे ॥ आज्ञापय मुनिश्रेष्ठ कार्यं यत्तेस्ति तद्वद ॥ विश्वामित्र उवाच ॥ नहं ते स्कम महाराज [illegible]रते बाल
कस्य च ॥ राजन् राज्यग्रहणात्वं जयं च विजयां तथा ॥ कुतः [illegible]म [illegible]रीतिं मुंक्ष्व भोगान्वै तेनानृ ॥ हरिश्चंद्र उवाच ॥
नाहं स्वप्नेपि विप्रेंद्र नान्नं तव कुर्तु सहे ॥ जन्मायुतशतेनापि किं पुनस्त्वेद्य जन्मना ॥ सूत उवाच ॥ एवमुक्तस्त
तो राजा विश्वामित्रो महामुनेः ॥ क्रोधाद्दारुकनयनो निष्ठुरं वचनं ब्रवीत् ॥ विश्वामित्र उवाच ॥ अधुना मम राजेंद्र
दापयतां खलु दक्षिणा ॥ राजसूयनिमित्तार्हि नान्नं तव वचो यदि ॥ राजोवाच ॥ ऋषे नाद्यापि मासोयं पूर्णो जात
स्तपोबल ॥ तुभ्यं तां दक्षिणां दद्यां प्रतीक्षस्व दिनत्रयं ॥ ऋषिरुवाच ॥ एवमस्तु महाराज ह्यागमिष्याम्यहं पु
नः ॥ शापं तव प्रदास्यामि न प्रदास्यसि चेद्धनं ॥ इत्युक्त्वा प्रययौ विप्रो भूपतिश्चापि पोशनेः ॥ शैव्यास्वयाया
नुगतो भार्यया बालपुत्रया ॥ १२७ ॥ इति श्री पद्मपुराणे पातालखंडे हरिश्चंद्रोपाख्याने अष्टमोध्यायः ॥ ८ ॥
सूत उवाच ॥ अथान्यस्मिन्नह्नितीये वृक्षमूले महामनाः ॥ आजगाम महायोगी वेदवेदांतपारगः ॥ हस्तोमा
यामयं सैन्यमप्रमे पंडरासदं ॥ हस्त्यश्वरथसंबाधं पदातिशतसंयुतं ॥ महाशंखनिनादैश्च भेरीणां च महास्वनैः ॥

सूतमागधसंघैश्च नादितं तदनंतरं बभौ ॥ अंतरिक्षात्तु सहसा पुष्पवृष्टिः पपात ह ॥ वायुश्च सुरभिर्वाति मनोज्ञः सु
खशीतलः ॥ जटाजूटेन दंडेन दंडकाष्ठेन राजते ॥ योगपट्टाक्षसूत्रेण संयुक्तः सकमंडलुः ॥ कौपीनेन मेखलायु
तो भस्मोद्धूलितविग्रहः ॥ आगत्य सहसा योगी हरिश्चंद्रमुवाच ह ॥ ऋषिरुवाच ॥ राजसूयमहायाग राजेंद्र जयाय च
द्विजपांतथा ॥ कुरु सौरव्य चमे क्षेत्रं भुंक्ष्व भोगाननुत्तमान् ॥ हरिश्चंद्र उवाच ॥ पुनरुक्तेन वाक्येन किमनेन द्वि
जोत्तम ॥ त्वत्समो हि मुनिर्नास्ति वचो ब्रूषे किमीदृशं ॥ किं न जानासि मां विप्र हरिश्चंद्रं तु नामतः ॥ सत्ये कृनिल
यं लोके ख्याति पन्नगुणाश्रयं ॥ ऋषिरुवाच ॥ दापयतां दक्षिणां तर्हि मद्वेष्टं करिष्यसि ॥ राजस्तु यन्निमित्तं हि यात्व
या प्राक् प्रतिश्रुता ॥ तत्त्यान् पश्यगद्दल रूपिणं तं हि न विध्यासि ॥ ब्रह्मस्वहारी पुरुषो गतिं प्राप्नोति नारकीं ॥
सूत उवाच ॥ इति श्रुत्वा नरेंद्रेण ऋषेर्वाक्यं सुदुस्तरं ॥ त्रातुं न शक्यते जंतुः रण जन्मसहस्रकैः ॥ स्मृत्वा गु
रुं तदा काले नाहि नाहीति चाब्रवीत् ॥ राजोवाच ॥ अतीव कुदमानो सौ राजा सत्यपराक्रमः ॥ धैर्यमालंब्य सं
क्षिप्य ऋषिं वचनमब्रवीत् ॥ राजोवाच ॥ सत्र हास्यामि तां ब्रह्मन् मासो घापि न पूर्यते ॥ तिष्ठ तावद्दिनं सा
यं तत्प्रतीक्षस्व नापरं ॥ ऋषिरुवाच ॥ गच्छ गच्छ महाभाग स्वसत्यमनुपालय ॥ नत्वाथ ऋषिचंद्र यं तत्वं राप्य

॥२१॥ ग्नि नादेहह ॥ सूत उवाच ॥ एतस्मिन्नंतरे राजा कुशिग्रं ददृशे तदा ॥ कथितं तत्सकलं तस्मै ऋषये ऋषिचेष्टितं ॥ विचार्य
मनसि क्षिप्रं श्रुत्वा स्वस्य च निष्कृतिं ॥ यथा पूर्वं देवराजाय कथिता देवमंत्रिणा ॥ सा विजित्य सुरान् सर्वान् भुंजे त्रै
त्रिविष्टपं ॥ सूर्यप्रीतिकरी षष्ठी स्वं तावपृथ्वीयोगिना ॥ ऋणत्रयस्य मुक्त्यर्थं सर्वपापप्रशांतये ॥ सूर्यषष्ठी हृतं पुण्यं
ऋषिस्तस्मै तु तां ददौ ॥ विनिर्गत्य च नगरात्तस्मात् स राजा ह्युद्धिजसत्तम ॥ अपश्यदमरप्रीतां पुरीं तां सुमनोरमां ॥
सुप्राकारे रजमानां सुदुमेन्केः मुञ्चविस्मितैः ॥ राजमार्गेण महता विस्तीर्णेन विराजितां ॥ ब्राह्मणैर्वेदविद्भि
श्च क्षत्रियैश्च स्वमार्गवैः ॥ वैश्यैश्चान्यापसंयुक्तैः शूद्रैः शुश्रूषणैरतैः ॥ उमया कांतया सार्द्धं यत्रास्ते शंकरः
स्वयं ॥ तां दृष्ट्वाथ पुरीं रम्यां मनसोल्हादकारिणीं ॥ उवाच स हृतार्थोस्मि पुरीं पश्य सुवर्चसां ॥ इति ब्रुवन् जगाम
थ सहपत्न्या सुतान्वितः ॥ ततो भागीरथीं प्राप्य स्नात्वा देवादितर्पणं ॥ देवार्चनं च निर्वर्त्य सह तत्वान्दिग्विलोकनं ॥
प्रविश्य वसुधापालो दिव्यां वाराणसीं पुरीं ॥ नैषा मनुष्यभुक्तेति शूलपाणेः परिग्रहः ॥ जगाम पद्भ्यां दुःखा
र्त्तो सह पत्न्या समाकुलः ॥ पुरीं प्रविश्य संतोपं विश्वासमकरोत्तदा ॥ ददर्शाथ मुनिश्रेष्ठं विश्वामित्रमवस्थि
तं ॥ तं दृष्ट्वा समनुप्राप्तो विनयावनतोब्रवीत् ॥ प्राह चैवांजलिं कृत्वा हरिश्चंद्रो महामुनिं ॥ इमे प्राणाः सुतश्चा ॥२१॥

यमिमां पत्नीं सुनेमम ।। एतत्ते सर्वमस्त्वाद्य गृहाणाद्य द्विजोत्तम ।। यत्रान्यत्कार्यमस्माभिस्तन्मामाज्ञातुमर्हसि ।।
विश्वामित्र उवाच ।। पूर्णः समासो भद्रं ते दीयतां मम दक्षिणा ।। राजसूयनिमित्तं हि स्मर्यते स्ववचो यदि ।। राजोवाच ।।
ब्रह्मन्नद्यापि संपूर्णो मासो भगवन्तपोबल ।। तिष्ठस्वैकं दिनार्धं तत्प्रतीक्षस्व नापरं ।। विश्वामित्र उवाच ।। एवमस्तु
महाराज आगमिष्याम्यहं पुनः ।। शापं तव प्रदास्यामि न चेद्दत्तं प्रयच्छसि ।। सूत उवाच ।। इत्युक्त्वा प्रययौ विप्रो
राजा चाचिंतयत्तदा ।। कथमस्मै प्रयच्छामि दक्षिणा या प्रतिश्रुता ।। कुतः पुष्टानि मित्राणि कुतोर्थः सांप्रतं मम ।। प्रति
ग्रहः प्रदुष्टो मे तत्र याञ्चा महे कथं ।। किं तु प्राणान्विमुंचामि कं दिशं प्रयामि किंचन ।। यदि प्राणान्विमुंचामि ह्यप्रदाय च
दक्षिणां ।। ब्रह्मस्वहा हृतेनापापो भविष्याम्यधमाधमः ।। अथवा प्रेष्यतां यास्ये वरमेवात्मविक्रयः ।। सूत उवाच ।।
राजानं व्याकुलं दीनं चिंतमानमधोमुखं ।। प्रत्युवाच तदा पत्नी बाष्पगद्गदया गिरा ।। त्यज चिंतां महाराज स्वसत्य
मनुपालय ।। प्रेतवद्वर्जनीयो सो नरः सत्यबहिःकृतः ।। नातः परतरं धर्मं वदंति पुरुषस्य च ।। यादृशं पुरुषव्या
घ्र स्वसत्यस्यानुपालनं ।। अग्निहोत्रमधीतं वा दानाद्याः सकलाः क्रियाः ।। भजंते तस्य वैफल्यं वाक्यं यस्यानृतं भ
वेत् ।। सत्यमत्यंतमुदितं धर्मशास्त्रेषु धीमतां ।। तारणायानृतं तद्वत्पातनायाकृतात्मनां ।। प्राप्तास्वमेधानांहस्य

॥२२॥ राजसूयं च पार्थिवः ॥ इति राजा सत्स्वर्गोदसहवचना श्रुतः ॥ राजन् जातमसत्संतेऽस्कंदायैर रोदह ॥ बाष्पव्या
पुतनेत्रांतामुवाँदेवे महीपतिः ॥ राजोवाच ॥ वं शावद्रुमरस्थायं पुत्रस्तिष्ठति बालकः ॥ उच्यतां वकुत्कामासि य
दाक्यं गजगामिनि ॥ पत्न्युवाच ॥ राजन् जातमसत्संते पुंसां पुत्रफलं स्त्रियः ॥ तमांत्रदापवित्तेन देहि विप्राय दक्षि
णां ॥ सूत उवाच ॥ एतद्वाक्यमुपश्रुत्य पयौमोहं महीपतिः ॥ प्रतिलभ्य च संज्ञां वै विललापातिदुःखितः ॥ मह
दुःखमिदं मे प्रेयत्वमेवं ब्रवीषि मे ॥ किं तवास्मितसंलापा ममपापस्य विस्ततः ॥ हा हा वयाकथंसोढुं वक्तुमे
तच्छुचिस्मिते ॥ दुर्वाच्यमेतद्वचनं कथं राज्ञ्यामहेप्रिये ॥ इत्युक्त्वा पतिमूर्च्छितो धिग्धिगितिसरुदंस्तु ॥ निपपात
महीपृष्ठे मूर्छयाति परिप्लुतः ॥ शयानं तं पतिं दृष्ट्वा मूर्छयातं महीपतिं ॥ उवाचेदं सकरुणं राजपुत्री सुदुःखिता ॥
हा महाराज कस्येदमपध्यानादुपागतं ॥ यस्त्वं निपतितो भूमौ रंकवच्छरणोचितः ॥ येनैवं कोटिरांगवित्तं प्राप्ति
स्वल तीतिद्विजार्जितं ॥ स एव पृथिवीनाथो भूमौ स्वपिति मे पतिः ॥ हा कष्टं किं तवानेन कृतं देवमहीक्षितः ॥ यदींद्रोपेंद्र
तुल्योयं नीतः पापामिमां दशां ॥ इत्युक्त्वा सापि सुश्रोणि मूर्छिता निपपात ह ॥ भर्तृदुःखमहाभारेणासहे
नानिपातिता ॥ तौ शिशुर्दृष्ट्वा ... वेष्टः प्राह वाक्यं सुदुःखितः ॥ तात तात ददस्वान्नं मातर्मे देहि भोजनं ॥ क्षुन्मे
बलवती जाता जिह्वाग्रं शुष्यते मुहुः ॥ ५७ ॥ इति श्रीपद्मपुराणे पातालखंडे हरिश्चंद्रोपाख्याने नवमोऽध्यायः ॥ ९ ॥ ॥२२॥

सूतउवाच॥ एतस्मिन्नंतरे प्राप्तो विश्वामित्रो महातपाः॥ अंतकालेवक्रुद्धोसौ धनंस्वंयाचितुंतं॥ ततालोक्य
हरिश्चंद्रं पपात भुविमूर्छि[illegible]परिणातमभ्युक्ष्य राजानमिदमब्रवीत्॥ उत्तिष्ठोत्तिष्ठ राजेंद्र स्वं॰ दस्वेष्टद
क्षिणां॥ ऋणं धारयतां दुःखमहन्यहनि वर्धते॥ आप्यायमानः स तदा हिमसीतेन वारिणा॥ अवाप्य चेतनां
राजा विश्वामित्रमवेक्ष्य च॥ पुनर्मोहं समापेदे ह्यथक्रुद्धो धंपयौमुनिः॥ समाश्वास्य च राजानं वाक्यमाह द्विजो
त्तमः॥ विश्वामित्रउवाच॥ दीयतां दक्षिणा सा मे यदि धैर्यमवेक्षसे॥ सत्येनार्कः प्रतपति सत्ये तिष्ठति मेदिनी॥
सत्ये चोक्तः परो धर्मः सत्ये स्वर्गः प्रतिष्ठितः॥ अश्वमेधसहस्रं तु सत्यं च तुलया धृतं॥ अश्वमेधसहस्राद्धि
सत्यमेवं प्रशिष्यते॥ अथवा किं ममैतेन प्रोक्तेनास्ति प्रयोजनं॥ अनार्ये पापसंकल्पे क्रूरे चानृतवादिनि॥
त्वयि राजेंद्र वदतः स्वभावः श्रूयतां मम॥ अद्य मे दक्षिणा राजन्न दास्यसि चेद्भवान्॥ अस्ताचलगते सूर्ये शप्स्या
मि त्वां ततो ध्रुवं॥ इत्युक्त्वा सो गतो विप्रो राजा चासीद्भयातुरः॥ कांदिग्भूतो वने निश्वोच्छ्वासध्वनिनादितः॥ सू
तउवाच॥ एतस्मिन्नंतरे विप्रो ब्राह्मणो वेदपारगः॥ ब्राह्मणैर्बहुभिः सार्धं प्रययौ स पुराद्बहिः॥ ततो राज
कृतं दृष्ट्वा आयांतं यानसंस्थितं॥ उवाच वाक्यं राजानं धर्मार्थसहितं तदा॥ त्रयाणामपि वर्णानां पिता ब्राह्मण

॥२३॥ उच्यते॥ पितृद्रव्यं हि पुत्रेण ग्रहीतव्यं न संशयः॥ तस्माद्देवकि याच्यः स्याद्धनार्थमिति मे मतिः॥ राजो वाच॥
नाहं प्रतिग्रहं कांक्षे क्षत्रियोऽहं सुमध्यमे॥ पावनं खलु विप्राणां क्षत्रियाणां न विद्यते॥ गुरुर्विप्रो हि वर्णानां पूज
नीयः स सर्वदा॥ तस्माद्गुरुर्न याच्यः स्यात् क्षत्रियाणां विशेषतः॥ यजनाध्ययनं दानं क्षत्रियस्य विधीयते॥
शरणागतानामभयं प्रजानां प्रतिपालनं॥ न याच्यं वै तु याचकं देहीति कृपणं वचः॥ ददामीत्येवमे विप्र हृदये नि
हितं वचः॥ अर्जित्वा कुत्रचिद्द्रव्यं ब्राह्मणाय ददाम्यहं॥ पत्नी उवाच॥ कालः समविषमकरः परिभवसम्मानद
कालः॥ कालः करोति पुरुषं दातारं याचितारं च॥ विप्रेण नकुषो राजा वृद्धेन रागमिछता॥ राज्यान्निरस्तः सौ
स्याश्च यस्य कालस्य चेष्टितं॥ राजो वाच॥ असिना तीक्ष्णधारेण वरं जिह्वा द्विधाहृता॥ न तु मानं परित्यज्य दे
हि देहीति भाषितं॥ क्षत्रियोऽहं महाभागे न याचे वै किं विदध्यहं॥ ददामि चाहं नित्यं हि भुजवीर्यार्जितं धनं॥
पत्न्युवाच॥ यदि ते हि महाराज याचितुं नोत्सहे मनः॥ अहं तु न्यायतो देवैः सर्वैरपि सवासवैः॥ अहं शास्या
च पात्या चरक्ष्यास्वैव महीपते॥ अवतार्य तु मां रंगे गुर्वर्थं संप्रदीयतां॥ एतद्वाक्यमुपश्रुत्य स हरिश्चंद्रो महीप
तिः॥ कष्टं कष्टमिति प्रोक्ता विललापातिदुःखितः॥ भार्या त्वं भूपः प्राहेदं क्रियतां वचनं मम॥ मा त्वाशापानलो निर्दध्यः
पंचत्वमुपयास्यसि॥ न द्यूतहेतोर्न वमयहेतोर्न राज्यहेतोर्न च भोगहेतोः॥ ददस्व गुर्वर्थमहो मया त्वं सत्यव्रतत्वं ॥२३॥

सफलं कुरु ॥ २८ ॥ इति श्रीपद्मपुराणे हरिश्चंद्रोपाख्याने दशमोऽध्यायः ॥ १० ॥ सूत उवाच ॥ स तप्यमानोऽमानोऽपि राजा प
त्यापुनः पुनः ॥ आहमद्रे करोम्येषां विक्रयं तव निर्घृण ॥ नत्वं सेरपि पत्नींतु नरक्षं तत्करोम्यहं ॥ यदि ते राज्य ते
वाणी वकुमीदृक्तु निष्ठुरं ॥ एवमुक्त्वा ततो राजा गत्वा नगरमातुरः ॥ अवतार्य तदा रंगे तां भार्यां नृपसत्तमः ॥ बाष्प
गद्गदकंठः सन्‌ ततो वचनमब्रवीत्‌ ॥ भोभो नागरिकाः सर्वे शृणुध्वं वचनं मम ॥ कस्यचिद्यदि कार्यं स्याद्दास्या प्राणे
ष्टया मम ॥ स ब्रवीतु त्वरायुक्तो यावल्लं धारयाम्यहं ॥ तेब्रवीन्मीलिताः कस्त्वं पत्नीं विक्रेतुमागतः ॥ राजोवाच ॥
किं मां पृच्छथ कस्त्वं भो रक्षं सोहममानुषः ॥ राक्षसो वातिकुष्ठी नस्तीलनः पापं करोम्यहं ॥ सूत उवाच ॥ तंत्वावदं सहसाभ्ये
त्य कौशिको विप्ररूपधृक्‌ ॥ वृद्धरूपं समास्थाय हरिश्चंद्रमभाषत ॥ समर्पयस्व मे दासीमहं क्रेता धनप्रदः ॥ अस्ति
मे वित्तमतुलं सुकुमारा च मे प्रिया ॥ गृहकर्मनरालास्ति कर्तुमस्मात्प्रयच्छ मे ॥ अहं गृह्णामि दासीं तु कृतिदास्या मि
तं धनं ॥ एवमुक्ते तु विप्रेण हरिश्चंद्रस्य भूपतेः ॥ विदार्यत्तु मनो दुःखान्न चैनं किंचिदब्रवीत्‌ ॥ विप्र उवाच ॥ कर्मणश्च
वयोरूपशीलानां तव योषितः ॥ अनुरूपमिदं वित्तं गृहाणार्पय मे बलां ॥ धर्मशास्त्रेषु यद्दृष्टं स्त्रियो मूल्यं नरस्य
च ॥ द्वात्रिंशल्लक्षणोपेता दक्षा शील गुणान्विता ॥ कोटिमूल्यं सुवर्णस्य स्त्रियः पुंसस्तथार्बुदं ॥ इत्याकर्ण्य वचस्तस्य

॥२४॥ हरिश्चंद्रो महीपतिः॥ दुःखेन महताविष्टो न चैनं किंचिदब्रवीत्॥ ततः स विप्रो नृपतेः पुरतो वल्कलोपरि॥ धनं निधाय
केशेषु धृत्वा तां राज्ञीमकर्षयत्॥ भार्योवाच॥ मुंच मुंचार्य मां साधो यावत्पश्याम्यहं सुतं॥ दुर्लभं दर्शनं विप्र पुनरस्य भ-
विष्यति॥ पश्येहं पुत्र मामेवं मातरं दास्यतां गतां॥ मा मां स्प्राक्षी राजपुत्र अस्पृश्याहं तवाधुना॥ ततः स बालः सह-
सा दृष्ट्वा कृष्टां तु मातरं॥ समभ्यधावदंबेति वदन् सास्रविलोचनः॥ हस्तेन वस्त्रमाकर्षन् कृपक्षधरस्खलन्॥
तमागतं द्विजः क्रोधाद्बालमभ्याहनत्तदा॥ वदंस्तथापि सोंबेति नैव मुंचति मातरं॥ राज्ञ्युवाच॥ प्रसादं कुरु मे नाथ
क्रीणीष्वेनं हि बालकं॥ क्रीतापि नाहं भवितावि नैनं कार्यसाधिका॥ इत्थं ममाल्पभाग्यायाः प्रसादं कुरु मे प्रभो॥ मां संयो-
जय बालेन वत्सेनेव पयस्विनीं॥ ब्राह्मण उवाच॥ गृह्यतां वित्तमेतत्ते दीयतां मम बालकं॥ स्त्रीपुंसोर्धर्मशास्त्रज्ञैः कृत-
मेव हि वेतनं॥ शतं सहस्रं लक्षं च कोटिमूल्यं तथापरैः॥ द्वात्रिंशल्लक्षणोपेता दक्षा शीलगुणान्विता॥ कोटिमूल्यं
स्त्रियः प्रोक्तं पुंसस्यैव तथार्बुदं॥ सूत उवाच॥ तथैव तस्य तद्वित्तं क्षिप्त्वा भर्तुः पटे पुनः॥ प्रगृह्य बालकं मात्रा स-
हैकस्थमबंधयत्॥ उशीनरीपुरस्थस्य ब्राह्मणो बालकान्वितां॥ प्रतस्थे स्वगृहं क्षिप्रं तया सह मुदान्वितः॥ प्रद-
क्षिणं तु सा कृत्वा जानुभ्यां पुरतः स्थिता॥ बाष्पपर्याकुला दीना इदं वचनमब्रवीत्॥ यदि दत्तं हुतं जप्तं ब्राह्मणास्त ॥२४॥

र्पि भायदि ॥ तेन पुण्येन मे भर्त्ता हरिश्चंद्रस्तु मे पुनः ॥ पादयोः पतितां दृष्ट्वा प्राणेभ्योपि गरीयसीं ॥ हा हेति सहसा राजा विल
लापाकुलेंद्रियः ॥ विमुक्तेयं कथं पत्नी सत्यशीलगुणान्विता ॥ वृक्षच्छाया यथा न्येति न हाति च कदाचन ॥ एवं भार्या च
भर्त्ता च सुसंबद्धौ परस्परं ॥ पुत्रं च तमुवाचेदं मां संत्यक्त्वा क्व यास्यसि ॥ कां दिशं प्रति यास्यामि को मे दुःखं निवारयेत् ॥
राज्यत्यागेन मे दुःखं वनवासेन नो द्विज ॥ यत्पुत्रेण वियोगो मे एवमाह स भूपतिः ॥ स भर्तृ भार्या हि सदा लोके भार्या न
वंतिहि ॥ मया त्यक्तासि कल्याणि दुःखेन विनियोजिता ॥ इक्ष्वाकुवंशसंभूतं सर्वं राज्यसुखोचितं ॥ मामी ध्रुवं पतिं प्रा
प्य दासभावं गतासि ॥ ईदृशो मज्जमानं मां सुमहद्धोकसागरे ॥ को मामुद्धरते देवि पौराणाख्यानविस्तरैः ॥ सूत
उवाच ॥ पश्यतस्तस्य राजर्षेः कषाघातैः सुदारुणैः ॥ घातयित्वा तु विप्रेंद्रो नेतुं समुपचक्रमे ॥ नीयमानौ तु तौ दृष्ट्वा
भार्यापुत्रौ स पार्थिवः ॥ विललापातिदुःखार्त्तो निश्वस्योष्णं पुनः पुनः ॥ या न वायुर्न चादित्यो न चंद्रो न पृथग्जनः ॥
दृष्टवंतः पुरा पत्नी सेयं दासित्वमागता ॥ सूर्यवंशप्रसूतोयं सुकुमारकरांगुलिः ॥ संप्राप्तो विक्रयं बालो धिङ्मामामस्तु
दुर्मतिं ॥ हा प्रिये हा शिशो वत्स ममानार्यस्य दुर्नयैः ॥ दैवाधीनां दशां प्राप्तौ नेतोस्मि तथापि धिक् ॥ सूत उवाच ॥
एवं विलपतो राज्ञः स विप्रोंतरधीयत ॥ वृक्षगेहादिभिस्तुंगैस्तावादाय त्वरान्वितः ॥ अत्रांतरे मुनिश्रेष्ठ आजगाम
महातपाः ॥ सच्छिष्यः कौशिकेंद्रो सौ निष्ठुरः क्रूरदर्शनः ॥ विश्वामित्र उवाच ॥ याचयेत्क पुनाराजन्राजसूयस्य द

॥२५॥ क्षिणा॥ तां ददस्व महाबाहो यदि सत्यं पुरस्कृतं ॥ हरिश्चंद्र उवाच॥ अभिवाद्ये त्वां ब्रह्मर्षे गृहाणेमां स्वदक्षिणां॥
राजसूयस्य यागस्य पालयित्वा पुरा नृप॥ विश्वामित्र उवाच॥ कुतो लब्धमिदं न यं दक्षिणार्थे महीपते॥ एतद
च क्षय राजेंद्र यथादित्यं त्वयार्जितं ॥ राजोवाच॥ किमनेन महाभाग कुपितेन त्वयानघ॥ शोकतमो वर्धते विप्र
तेनानेन सुव्रत॥ ऋषिरुवाच॥ अरारंते वेन्ते गच्छामि रात्रमे वत्रय धुमे॥ कृत्यस्यागमनं राजन् कथयस्व यथा
तथं॥ राजोवाच॥ मया देवी तु सा भार्या विक्रीता कोटिसंमिते ॥ निष्कैः पुत्रोऽपि ताश्चो विक्रीतोऽर्बुदसंख्यया॥
विप्रेणादरात्क्रोध्य स्वं सुवर्णस्य गृहाणमे॥ सूत उवाच॥ तद्दृष्ट्वा तं स्वर्णमालक्ष्य दारविक्रयसंभवं॥ शोकाभिभूतं
राजानं कुशिकः कुपितोऽब्रवीत्॥ ऋषिरुवाच॥ राजसूयस्य यज्ञस्य नैषा भवति दक्षिणा॥ अन्यदुत्पाद्य क्षिप्रं
संपूर्णा येन सा भवेत्॥ क्षत्रबंधो ममैषा त्वं सदृशीं यदि दक्षिणां॥ मन्यसे यदि न क्षिप्रं पश्य त्वं मे परं बलं॥ तपस्त
स्य सुतप्तस्य ब्राह्मणस्यामलस्य च॥ मत्प्रभावस्य चोग्रस्य शुद्धस्याध्ययनस्य च॥ राजोवाच॥ अन्यद्दास्या
मि भगवन् कालः कश्चित्प्रतीक्ष्यतां॥ अधुनैवास्ति विक्रेता पत्नी पुत्रस्य बालकः॥ विश्वामित्र उवाच॥ चतु
र्भागः स्थितो योऽयं दिवसस्य नराधिप॥ एष एव प्रतीक्ष्यो मे वक्तव्यं नोत्तरं त्वया॥ ५५॥ इति श्रीपद्मपुराणे हरिश्चं ॥ ... २॥

द्रोपाख्याने एकादशोध्यायः ॥ ११ ॥ सूत उवाच ॥ तमेवमुक्तो राजानं निर्घृणं निष्ठुरं वचः ॥ तत्र दायधनं तूर्णं कुशिकः
कुपितो ययौ ॥ विश्वामित्रे गते राजा भयशोकमुपागतः ॥ श्वासोच्छ्वासं मुहुः कृत्वा प्रोवाचोच्चैरधोमुखः ॥ वि
त्तक्रीतेन यस्यास्ति मया प्रेष्येण मानवाः ॥ स ब्रवीतु त्वरायुक्तो यावत्तिष्ठति भास्करः ॥ अथाजगाम त्वरितो ध
र्मश्चांडालरूपधृक् ॥ दुर्गंधो विकृतो रूक्षो श्मश्रुलो दंतुरो घृणी ॥ कृष्णो लंबोदरः स्निग्धः करालः पुरुषाधमः ॥
हस्ते जर्जरयष्टिश्च शवमाल्यैरलंकृतः ॥ कपालहस्तो दीर्घास्यो लोहितप्रांतलोचनः ॥ श्वगणाभिवृतो घो
रो रज्जुबद्धोर्ध्वजूटकः ॥ चांडाल उवाच ॥ अहं गृह्णामि दासं त्वां भस्वार्थः सुमहान्मम ॥ क्षिप्रमाचक्ष्व मौल्यं त्वं वि
मेतत्ते प्रदीयतां ॥ सूत उवाच ॥ तं तादृशमथालक्ष्य क्रूरदृष्टिं सुनिर्घृणं ॥ वदंतमतिदुःशीलं कस्त्वमित्याह पार्थिवः ॥
चांडाल उवाच ॥ चांडालोहमहं ख्यातः प्रवीरेति नृपोत्तम ॥ श्मशाने सर्वदा तिष्ठन्मृतचेलापहारकः ॥ तस्यैवं
वदतो राज्ञश्चांडालः पुरतः स्थितः ॥ ब्रूहि किं या वसेति तत्र दास्यामि निश्चयं ॥ एवमुक्तस्तदा राजा वचनं चेदमब्र
वीत् ॥ ब्राह्मणः क्षत्रियो वापि गृह्णात्विति मतिर्मम ॥ उत्तमस्योत्तमो धर्मो मध्यमस्य च मध्यमः ॥ अधमस्याधम
श्चैव इति प्राहुर्मनीषिणः ॥ चांडाल उवाच ॥ एवमेतत्त्वया धर्मः कथितो नृपसत्तम ॥ अविचार्यं त्वया राजन्नधुनोक्तं
जनाग्रतः ॥ विचारइत्वायोग्यं तत्सोभीष्टं लभते नरः ॥ सामान्यमेव तद्योक्तं मयि चार्यं त्वया न च ॥ यदि सत्यं प्रमाणं ते

॥२५॥ महातोसि नसंशयः॥ अथवा राजन्सेसत्यं स्ववाक्य प्रतिलंघनात्॥ ततोहं नैव गच्छामि त्वामसत्यं नराधम॥ हरिश्चंद्र
उवाच॥ असत्यान्नरकं गच्छेत्सचः क्रूरे नराधमाः॥ ततश्चांडालतां साध्वी नवरं मे ह्यसत्यता॥ सूत उवाच॥ तस्यैवं व
दतः प्राप्तो विश्वामित्रस्तपोनिधिः॥ कोपामर्षविवृताक्षः प्राह चेदं नराधिपं॥ चांडालोयमनल्पं ते दातुं वित्तमुपस्थि
तः॥ कस्मान्न दीयते मह्यमशेषा यज्ञदक्षिणा॥ राजोवाच॥ भगवन्सूर्यवंशोत्थं मां नैवेप्सि कौशिक॥ कथं चांडाल
दासत्वं गमिष्ये वित्तकाम्यया॥ विश्वामित्र उवाच॥ यदि चांडालवेत्तं वै मामाप्स्यसि विक्रयजं मम॥ न प्रदास्यसि चेद्वित्तं तर्हि
शाप्स्यामि त्वां नसंशयः॥ चांडालादथवा विप्राद्धि मे दक्षिणाधनं॥ विना चंडालमधुना नान्यः कश्चिद्धनप्रदः॥ धने
नाहं विना राजन्प्राप्स्ये नसंशयः॥ इदानीमेव मे वित्तं न प्रदास्यसि चेन्मम॥ दिनार्धं घटिका शेषे तत्वां शापाग्निनाद
हे॥ सूत उवाच॥ हरिश्चंद्रस्ततो राजा मृतवत्स्थितजीवितः॥ प्रसीदेति वदन्पादौ ऋषेर्जग्राह विह्वलः॥ राजोवा
च॥ दासोस्म्यनोस्म्यहं दीनो त्वद्भक्तश्च विशेषतः॥ प्रसादं कुरु विप्रर्षे कष्टश्चांडालसंश्रयः॥ भवेयं वित्तशोषेण
तवकर्मकरो वशः॥ तथैव मुनिशार्दूल प्रेषितश्चानुवर्तकः॥ विश्वामित्र उवाच॥ एवमस्तु महाराज ममैव भवत्किंक
रः॥ किंतु मद्वचनं कार्यं सर्वं देव नराधिप॥ सूत उवाच॥ एवमुक्तेतु वचने राजा हर्षसमन्वितः॥ अमन्यत पुनर्जा ॥२५॥

मात्मानं प्राह कौशिकं ॥ तवादेशं करिष्यामि सदैवाहं न संशयः ॥ आदेशय द्विजश्रेष्ठ किंकरोमि तवानघ ॥ ऋषिरुवाच ॥
चांडालागच्छ मद्दासमौल्यं किं मे प्रयच्छसि ॥ गृहाण दासमौल्येन मया दत्तं तवाधुना ॥ नास्ति दासेन मे कार्यं वित्ता
र्गावर्त्तते मम ॥ सूत उवाच ॥ एवमुक्ते तदा तेन चांडालो हृष्टमानसः ॥ आगत्य सन्निधौ तूर्णं विश्वामित्रमभाषत ॥
चांडाल उवाच ॥ दशयोजनविस्तीर्णं प्रयागस्य च मंडलं ॥ भूमिं रत्नमयीं दत्वा दास्यते हं द्विजोत्तम ॥ अस्य वि
क्रयणेनाद्य मम ॥ निर्भर्त्सहता त्वया ॥ प्रागेवायं मया प्रोक्तो तत्प्रमाणं न पास्यति ॥ असत्योयं महाभाग तथा मत्तश्चं
गर्हितः ॥ सूत उवाच ॥ ततो रत्नसहस्राणि सुवर्णमणिमौक्तिकं ॥ पुरुषस्य ततो राज्ञी चकार द्विजसत्तम ॥ ततो निवा
रितस्तेन चंडालः श्रूयतामिति ॥ हरिश्चंद्रस्तथा राजा जानिर्विकारमुखोभवत् ॥ अमन्यत तदा धैर्याद्विश्वामित्रो हि मे
पतिः ॥ तवदेव मया कार्यं यदयं कारयिष्यति ॥ अर्थांतरिक्षे सहसा वागुवाचाशरीरिणी ॥ अनृणोसि महाराज दत्ता
सा दक्षिणा त्वया ॥ ततो दिवः पुष्पवृष्टिः पपात नृपमूर्द्धनि ॥ साधु साध्विति तं देवाः प्रोचुः सेंद्रा महौजसः ॥ हर्षे
ण महता विष्टो राजा कौशिकमब्रवीत् ॥ राजोवाच ॥ त्वं हि माता पिता चैव त्वं हि बंधुर्महामते ॥ यदर्थं मोक्षितोहं
तेरुणाच्चैवानृणीकृतः ॥ किं ब्रूयेभिमतं वाहोस्मि यो मे वचनं तव ॥ एवमुक्तो वदनेन नृपं मुनिरभाषत ॥ चांडालवच

॥२७॥ नंकार्यमपत्रभृतिते नृप॥ स्वस्ति तेस्तिनितं प्रोक्तं तत्पदं पद्मनंमयो॥४७॥ इति श्री पद्मपुराणे हरिश्चंद्रोपाख्या
नेद्वादशोध्यायः॥१२॥ शौनक उवाच॥ पूर्वं यत्कथितं सूत वसिष्ठेन महात्मना॥ षष्ठ्याः जनितपुण्येन राजा मुक्तोऽत्र
णार्णवात्॥ चतुर्थ्यश्च गणनाथस्य पुण्या या नवमी तथा॥ रुद्रस्य भूतान्प्रियद्वादशी विष्णुवल्लभा॥ अमापितृ
णां तत्हिं चमासिमासि ददातिवै॥ सूर्यस्य पूजनं प्रोक्तं सप्तम्यां रविवासरे॥ कस्य योगे न षष्ठी विख्याता रविवास
रे॥ तद्ब्रूहि सकलं सूत पृच्छते मे विदांवर॥ शृण्वतां तव वाक्यानि नास्ति तृप्तिर्महामते॥ सूत उवाच॥ प्रश्नोयम
तुलो विहृत्र भवता यदितो मम॥ सर्वेषां कार्यजातानां साधनं परमं सदा॥ सर्वपापहरं नृणां महत्सु दारिद्र्यनाश
नं॥ कथयामि परं गुह्यं यमां त्वं परिपृच्छसि॥ माघसि भाद्रपदे स्पृष्ठ पक्षे षष्ठ्यां तु भूमिजे॥ रोहिणी ऋक्षसंयो
गे व्यतीपाते तु योगेन तु॥ यद्येवं प्राप्यते योगः कदाचित्काल योगतः॥ पूर्वं कृष्णेन कपिलः संप्राप्तो नारदे गतौ॥
राजा सत्यजिते नासौ षष्ठ्याः पुण्येन योजितः॥ तदाप्रभृति सा षष्ठी कपिला रविवल्लभा॥ तस्यानुष्ठानमात्रेण
मुच्यंते सर्वबंधनैः॥ शौनक उवाच॥ कस्माद्दत्तं धनं तेन कपिलेन महात्मना॥ नदत्तं हे तु ना केन तन्मे विस्तरतो
वद॥ सूत उवाच॥ स्कंदाय ब्रह्मणा पूर्वं कथिता या पुरातनी॥ तां कथां कथयिष्यामि तवाग्रे पुण्यवर्धनीं॥ पूर्वमासी ॥२७॥

शुचिर्विप्रः कपिलो नाम नामतः ॥ प्रतिज्ञाय द्विजातिभ्यो श्राद्धकर्मणि दक्षिणां ॥ पंचत्वमगमन्मूढो दक्षिणां तां न
दत्तवान् ॥ ततो देहांतरं प्राप्य जगाम यमसन्निधौ ॥ यमस्तं पापिनं दृष्ट्वा दूतानाज्ञापयत्तदा ॥ दंड्यतां ताड्यतां
तं तु बध्यतां पाशबंधनैः ॥ रौरवादिषु घोरेषु पच्यतां पापकृद्द्विजः ॥ ततो दंडधरैर्दूतैः वज्रहस्तैः समुद्गरैः ॥
पतितो धरणीपृष्ठे यमपाशैः सुयंत्रितः ॥ मुद्गरैस्ताड्यमानो सौ क्रकचैर्दारितः स्वयं ॥ रौरवादिषु घोरेषु पच्य
मानो मुहुर्मुहुः ॥ सूचीमुखैर्दार्यमाणः संतप्तो नरकाग्निना ॥ न तत्र लभते शर्म नरकार्णवमध्यतः ॥ तस्य पाप
स्य घोरस्य भोगो तीव्रसुदारुणः ॥ भोक्तुं न शक्यते सोढुं महानरकवेदनां ॥ वेदनाभिः पीडितोसौ बहुक्लेशसम
न्वितः ॥ लोहचंचुमयैः काकैर्दारितश्च पुनः पुनः ॥ स पूर्वजन्मजनितं नैनो जानाति मोहितः ॥ स्वीयं पप्रच्छ ततो
पूर्वजन्मकृतं द्विजः ॥ यमदूतं महामोहात्कृपया समभिप्लुतं ॥ यमदूत महाभाग सर्वसत्करुणानिधे ॥ केन मे कर्मणा दुः
खमीदृशं समुपस्थितं ॥ कारुण्यात्तस्य विप्रस्य प्रत्युवाच स किंकरः ॥ श्राद्धहेतं त्वया विप्र प्रतिज्ञाता च दक्षिणा ॥
सा न दत्ता द्विजातिभ्यस्तस्येदं कर्मणः फलं ॥ तेन पापेन घोरेण पच्यते नरकार्णवे ॥ एवमुक्तस्तदा तेन चिंतया पीडि
तोभवद्भृशं ॥ एतस्मिन्नेव काले तु पुण्यभारेण गर्वितः ॥ विमानवरमारूढो देवकन्यासमन्वितः ॥ नारायणगणैः सेव्यो
नारदाद्यैः सुरर्षिभिः ॥ सत्यजिन्नाम राजेंद्रो यज्ञपुण्यैः सुदर्पितः ॥ तेन मार्गेण वैकुंठमाजगाम महायशाः ॥ मध्ये

॥२८॥ यमपुरीं दृष्ट्वा तद्दर्शनहृतक्षणाः॥ विलोकया मासतत्रायमलोकं महत्सुधीः॥ तस्य दर्शनमात्रेण यमदूतादि दुर्गे
दुर्गा॥ पलायमानाः सर्वेपि पुण्यतेजस दर्शनात्॥ दृष्टो सो नरके स्थैः स्तत्प्राणिभिः पापकारिभिः॥ हर्षितास्ते
सोख्यमुक्ताः कोयं कोयं प्रजल्पतुः॥ सर्वे समागतास्तत्र सुखिनस्तत्प्रसादतः॥ तेपि सर्वे विशुद्धकायास्तेजसा च
कव वसुः॥ संजाताः शुद्धमनसो गंगां प्राप्य यथा जनाः॥ तैः सर्वैः सत्यजिद्राजा वंदितस्तु मुहुर्मुहुः॥ ते च प्रांजल
यः सर्वे तु चुदरिनास्तथान्यपं॥ कस्त्वं समागतइह संतप्तामतवर्षकः॥ तत्संदर्शनादेव गतेयं नारकी व्यथा॥
मनांसि सुखरूपाणि संजातानि च सर्वथा॥ त्वत्स्वरूपप्रभावोयं सीतो स्माभिर्नरेश्वर॥ किं त्वं शचीपतिः साक्षात्स
हस्रांशु रथापि वा॥ किं वा उमापतिः साक्षादथवा श्रीपतिः स्वयं॥ किं वापि नामहः साक्षात्तेजसा भाससे न च॥
अत्र तत्कस्य भावस्ते दृष्टोस्माभिर्महीभुज॥ सर्वदुःखनिवृत्तिश्च जाता वै तव दर्शनात्॥ एवमुक्तास्तु ते सर्वे रा
जानं प्रति षण्मुखे॥ ततो राजा हृष्टा विष्टो गत्वा वैवस्वतांतिके॥ स्तुत्वा नानाविधैः स्तोत्रैः रुवाच त्वरयान्वितः॥
सत्यजिदुवाच॥ देव वस्वत महाभाग प्राणीनां हितकारक॥ एते पापा दुरात्मा वा दुःखिनः हृपणाधमाः॥ एतेषां नि
ष्कृतिः कस्मादुक्ता त्वं धर्मराट् स्वयं॥ धर्मराज उवाच॥ सर्वेषां निष्कृतिर्दृष्टा धर्मशास्त्रेषु संततं॥ ब्रह्मस्व हारीषु ॥२९॥

रूपमत्तस्यनैवास्ति निष्कृतिः ॥ सत्यजिदुवाच ॥ कोसौब्रह्मस्वहारी च एषां मध्ये स कथ्यतां ॥ कथं च निष्कृतिर्नास्ति
ब्रह्मस्वस्य महीपते ॥ यम उवाच ॥ विषमेकाकिनं हंति ब्रह्मस्वं पुत्रपौत्रकं ॥ विषाच्छतगुणं दुष्टं ब्रह्मस्वं विद्धि सु
व्रत ॥ तस्माद्धि नरके घोरे कपिलो नाम नामतः ॥ पच्यते धनहारी च ब्राह्मणानां महात्मनां ॥ सत्यजिदुवाच ॥ क
स्माद्धृतं धनं तेन ब्राह्मणस्य तु धर्मराट् ॥ न दत्तं हेतुना केन तन्मे विस्तरतो वद ॥ यम उवाच ॥ पुरा हृतं
पितुः श्राद्धं कपिलेन दुरात्मना ॥ प्रतिश्रुता दक्षिणा च न दत्ता पापबुद्धिना ॥ तेन कर्मविपाकेन पच्यते नरकाग्निना ॥
न तस्य निष्कृतिर्भूप यावच्चंद्रार्कतारकाः ॥ राजोवाच ॥ ब्रह्मस्वादिः पापराशिर्भस्मी भवति येन च ॥ तद्ब्रूहि सम म
पुण्यं त्वं दास्येहं कपिलादिकान् ॥ उद्धरिष्ये तु निरयान्नेष्येहं हरिमंदिरे ॥ नास्ति चेत्सुकृतं मह्यं तदहं नारकी
भवः ॥ एषां सदैव दुःखानि मोक्ष्येहं रविनंदन ॥ एते दुष्कृतिनो म्लानवदना म्लानिभाषिणः ॥ एषां त्यागं कथं
यास्ये पुण्यलोकं निरामयं ॥ यम उवाच ॥ पुण्यमेकं पुरा वत्स स्वकृतं पापविनाशनं ॥ सो रंपापतमध्वंसकारकं दुःख
दारणं ॥ भाद्रमासे व्यतीपाते षष्ठ्यां रोहिणि भूमिजे ॥ रवौ वारे कृतं वत्स तत्पुण्यफलदानतः ॥ ब्रह्मस्वहा
रिणो येन सुरापा स्वर्णहारिणः ॥ रुरुकारे च मिश्रता मुच्यंते नात्र संशयः ॥ एवमाकर्ण्य नृपतिः प्रहर्षेणा
त्फुल्ललोचनः ॥ पुण्यदानेमनः कृत्वा यमं प्रति हेतवे ॥ ततः पद्मीसमुद्भूतफलस्याद्धं द्विजन्मने ॥ कपिलायप्रद

॥२९॥ तंवतेनासौविह्वलोभवेत् ॥ पुनः श्वपाचितोराजा हीनोदुःखमानसः ॥ अर्बुदेदेतु सर्वेषांपापीनां नरकौकसां ॥ तेन
तेसुखिनोजाता निर्भयाः सूर्यवंशजाः ॥ विमानवरमारूढा हर्षनिर्भरमानसाः ॥ गत्वा वैकुंठभवनं स्तस्थुर्वै ते च सत्य
जिद्वतं ॥ उद्धृतः श्वपिलोकेभ्यस्मात् सत्यजित्सुतस्तेनवै ॥ तदाप्रभृतितसा षष्ठी कपिलेति प्रकीर्तिता ॥ एवं त्रयावासा
षष्ठी यथा यमपुरं महत् ॥ उद्धृत्य संवहरतं वसपापिनोपि दिवंगता ॥ कार्त्तिके यमहाभाग ये कुर्वंति भुविस्थिता ॥
तेषां भुक्तिश्च मुक्तिश्च भविष्यति न संशयः ॥ अतस्त्वेतत्प्रयत्नेन कर्त्तव्या पुण्यमीप्सुभिः ॥ उत्कृतिश्चाणि योगोपि च
दिक्कैकोपिवा भवेत् ॥ तदा येपि प्रकुर्वंति तेयांति परमं पदं ॥ ८२ ॥ इति श्रीपद्मपुराणे हरिश्चंद्रोपाख्याने त्रयो
दशोध्यायः ॥ १३ ॥ सौनक उवाच ॥ ततः किमकरोद्राजा चांडालस्य गृहं गतः ॥ तद्ब्रूहि सूत वर्य त्वं पृच्छतः सत्वरं
हि मे ॥ सूत उवाच ॥ विश्वामित्रे गते विप्र श्वपचो हृष्टमानसः ॥ विश्वामित्राय तद्द्रव्यं दत्वा बध्वा नरेश्वरं ॥ अ
सत्योयास्य सिद्धकारे दंडेनाताडयत्तदा ॥ दंडप्रहारसंभ्रांतमतीवव्याकुलेंद्रियं ॥ इष्टबंधुवियोगार्त्तमानीय नि
जपत्तने ॥ निगडे स्थापयित्वा तं स्वयं सुष्वाप विज्वरः ॥ निगडस्थस्ततो राजा वसंश्चांडालपत्तने ॥ अन्नपानं परि
त्यज्य सदा वेतद्रोरुदत् ॥ तन्वी दीनमुखी दृष्ट्वा बालं दीनमुखं पुरः ॥ मां स्मरत्यसौ सुखा विष्टो मोक्षयिष्यति नौ
नृपः ॥ उपात्तवित्तो विप्राय दत्वा वित्तं प्रतिश्रुतं ॥ रुदमानं सुतं बालं मे वंसं बोधयिष्यति ॥ तानयाम्र्वे जानामीति ॥२९॥

दंतं बालकं पुनः ॥ तातताते निभाषंतं तथा संबोधयिष्यति ॥ नसामांमत्र गत्रावाक्ष्यौ वेत्ति चांडालतां गतं ॥ राज्यनाशः सुत
नाशो भार्या तनयविक्रयः ॥ नतश्चांडालता चेयमहो दुःखपरंपरा ॥ एवं संनिवसंनित्यं स्मरंश्च पितावचनं ॥ [illegible]
वासेसमाविष्टांहृतसर्वस्व आतुरः ॥ अथाधिपं चमेते न निगडान्मोचितो नृपः ॥ चांडालेनानुशिष्टश्च मतचेलाप
हारणे ॥ हृष्टेनपरमेघेर्वा कौनिर्भर्त्स्य च पुनः पुनः ॥ वाराणस्यां दक्षिणे भागे श्मशानं तिष्ठते महत् ॥ तद्रक्षस्वय
थान्याय्यं न त्वाज्यतत्त्वया क्वचित् ॥ इमं च जर्जरं दंडं गृहीत्वा याहि माचिरं ॥ वीरबाहो अयं दंडो शति घोषस्य स
वेतः ॥ सूत उवाच ॥ कस्यचित्त्वथ कालस्य मृतचेलापहारकः ॥ हरिश्चंद्रोभवद्राजा श्मशाने तद्वशानुगः ॥ चांडाले
नानुशिष्टस्तु मृतचेलापहारिणा ॥ इदं राज्ञो धनं धदेयं षड्भागं तु शवं प्रति ॥ त्रयस्तु मम भागास्यु द्वौ भागौ तव वेत
नं ॥ इति राज्ञा समाविष्टो जगाम शवमंदिरं ॥ पुर्यास्तु दक्षिणेभागे विद्यमानं भयानकं ॥ शवमाल्यसमाकीर्णं
बहुदुर्गंधधूमकं ॥ श्मशानं चोसैरेनादैः शिवाश्वतसमाकुलं ॥ गृध्रगोमायुसंकीर्णं श्वबृंदपरिवारितं ॥ अस्थि
संघातसंकीर्णं महादुर्गंधसंकुलं ॥ अर्धदग्धशवास्यानां विकसद्दंतपंक्तयः ॥ हसंतीवाग्निमध्यस्था कायस्येवं
दशास्थिति ॥ नानामस्तुहृ नादं महा कोलाहलाकुलं ॥ हा पुत्र मित्र हा बंधो धातर्वत्स प्रियाद्यने ॥ हे पते भागिनेया
ता ॥

॥३०॥ हे हा मातुलपितामह॥ मातामह पितः पौत्र कांतो स्येह बांधव॥ इति शब्दैः समाकीर्णं भैरवं सर्वप्राणिनां॥ ज्वलन्मांसवसा
मेघ धूमिघूमितिसंकुलं॥ अग्निश्चटचटाशब्दो भैरवो यत्र जायते॥ कृष्णातस दृष्ट्वा घोरं श्मशानं तत्सुदारुणं॥ सरा
जातत्रसंप्राप्तोदुःखा देवमरोच यत्॥ हा भ्रत्सामंत्रिणो मित्राः क्व तद्राज्यं कुलोचितं॥ हा प्रिये पुत्र मे बालमान्यकामंद
भागधकं॥ विश्वामित्रस्य कोपेन गताः कुत्रापि ते मम॥ विना धर्ममनुष्याणां जायते न शुभं क्वचित्॥ यत्नतो धारये तस्मा
त्पुरुषो धर्ममेव हि॥ इत्येवं चिंतयंस्तत्र चांडालोक्तं पुनः पुनः॥ मलिनो रूक्षसर्वांगः केशवागंधवांस्तदा॥ लगुड
कालकंपश्च धावश्चापि इतस्ततः॥ अस्मिन्निदं च द्रव्यं मौल्यं प्राप्स्यामि चाग्रतः॥ इदं मम इदं राज्ञो इदं चांडाल
कस्य च॥ इत्येवं चिंतयन् राजा जीविन्यो न्यंतरं गतः॥ जीर्णकर्पटसुयंथिरतकृंथापरिग्रहः॥ चिताभस्मरजोलि
समुखबाहुदरांघ्रकः॥ नानामद वसामज्जा लिप्तपाण्यंगुलिर्भ्वसन्॥ नानाशावोदनहतहारस्तृप्ति प्रसायणः॥ त
दीपमाल्यसंश्लेषहृतमस्तकमंडलः॥ नरात्रौ न दिवा शेते हाहेति प्रवदन्मुहुः॥ एवं द्वादशमासास्तु नीता वर्ष
शतोपमाः॥ कदाचिन्नृपतिश्रेष्ठः श्रांतो बंधुवियोगवान्॥ निद्राभिभूतो सुप्तो सौ निश्चेष्टः सुप्तएव सः॥ तत्रापि द्रा
यनीयेसौ दृष्टवान् अद्भुतं महत्॥ श्मशानाभ्यासयोगेन दैवस्य बलवत्तया॥ अन्यदेहेन तत्रासु गुरवेउरुदक्षिणा॥ ॥३०॥

तस्माद्दश वर्षाणि दुःखदा नात्र निष्कृतिः॥ आत्मानं सददर्शाथ पुल्कसी गर्भसंभवं॥ तत्रस्थश्चाप्यसो राजा
सोचिंतयदिदं तदा॥ इतो निष्क्रांतमात्रोहि दानधर्मं करोम्यहं॥ अनंतरं स जातस्तु तदा पुल्कसबालकः॥ श्मशा
नमृतसंस्कारकरणे सुसंस्थितः॥ अथ सप्तमे वर्षे स्मशानेथ मृतो द्विजः॥ आनीतो बंधुभिर्दृष्टस्तेन तत्राध
नोधनी॥ तेन मूल्यार्थिनो विप्राः परिभूताः समंततः॥ ऊचुस्ते ब्राह्मणास्तत्र विश्वामित्रस्य चेष्टितं॥ पापिष्ठ
मा शुभं ह्येवं कुरु ते पापकारक॥ हरिश्चंद्रः पुरा राजा हरिश्चंद्रेण पुल्कसाः॥ कृतपुण्यविनाशेन ब्राह्मणस्वाप
नाशनात्॥ यद्दानं क्षत्रमते तेषां तैः सुमहत्कृतदारुषा॥ गच्छत्वं नरकं घोरमधुनैव नराधिप॥ इत्युक्तमात्रे वच
नेस्व प्रस्थ सन्नतस्तदा॥ अपश्यच्च यमदूतान्वै पाशहस्तान्भयावहान्॥ तैः संगृहीतमात्मानं नीयमानं तदा
बलात्॥ पश्यति स्म भृशं खिन्नो हा मातः पितरश्च मे॥ एवं वादीस नरके तैलद्रोण्यां निपातितः॥ क्रकचैः पीड्य
मानोसो क्षुरधाराभिरप्यथ॥ अंधे तमसि दुःखार्तः पूयशोणितकर्दमः॥ सप्तवर्षम नात्मानं पुल्कसं वेदद
शोह॥ रात्रिंदिनं तु नरके दह्यते पच्यते न्यतः॥ शोष्यते क्षीयते न्यत्र हूयते म्रियते न्यतः॥ खिद्यते क्षोभ्यते न्यत्र
मार्यते ताड्यते न्यतः॥ क्षायते रीष्यते न्यत्र शीतवाताहतो न्यतः॥ दिनमेकं वर्षशतप्रमाणं नरके भवत्॥ तथा वर्ष

॥३१॥ त्रातं तस्य श्रावितं नरके भटैः॥ ततो निर्यातितो भूमौ श्रोकथ्या कुललोचनः॥ विष्टाशी श्वाप्यजायेत मासमात्रेमृतो विसः॥
अथापन्नस्य स्थिरं देहं हस्तिनं वानरं पशुं॥ छागं विडालकं कंकं च गांस्त्रियं महिषिका हतिं॥ महयंकू मत्कुणं चैव श्वावि
कं कुक्कुटं शुभं॥ सारिकां घूरलां चैव सर्पमत्स्या श्वदेहिनः॥ दिवसे दिवसे जन्ममरणं प्राणिनस्तदा॥ अपन्नस्य दुः
खसंतप्तो दिनं वर्षशतोपमं॥ एवं वर्षत्रातं तस्य गतं ह वै कुयोनिषु॥ अपत्रस्य सवृंदाचेच्छ राज्यं तत्स्वकुलोद्भवं॥
तत्र स्थितस्य तस्यापि राज्यं कृतेन हारितं॥ भार्या हता च पुत्रश्च स चैकाकी वनं गतः॥ तत्रापन्नस्य सिंहो वै व्यादि
तास्यं भयावहं॥ विभक्षयितुमायांतं शरभेण सभक्षितः॥ पुनश्च भक्षितः सोपि भार्या ग्रोचितमुपेतः॥ हा
योकंगः तास्य च मामिहायास्य दुःखितं॥ अपत्रपस्तु नरे वापि भार्यास्त्वां सह पुत्रकां॥ त्रायस्व तं हरिश्चंद्रं दृष्टं पतेन
तव प्रभो॥ पुत्रस्तेत्रगोच्यतां प्राप्तो भार्यया रोव्यया सह॥ सनापत्रपस्तु नरपि स्वर्गस्थः स नराधिपः॥ मुक्तांस देरीतो
निश्चांबशोनिर्व्यसनां बलात्॥ आक्रंदसं तरिक्षस्थो मागच्छेह नराधिप॥ विश्वामित्रेण विक्षिप्तो यमो राजंस्तवार्थे
तः॥ इत्युक्ते सर्वपाशेस्तु बद्धः सोधतदा बलात्॥ आहूदेवेन कथितं विश्वामित्रस्य चेष्टितं॥ तथापि तस्य विहृति
नोधमो धाव्य वर्धत॥ एताः सर्वा दशास्तस्य स्वप्ने पाः संप्रदर्शिताः॥ सर्वास्तास्तेन संभुक्ता यावद् घटिका दशा॥ ॥२१॥

द्वादशो वर्षे शेषे तु नायमानो भवेद्बलात्।। यमः सोपि श्यशाकः सोस उवाच नराधिपं।। विश्वामित्रस्य कोपोयं दुर्निवार्यो म
हात्मनः।। पुत्रस्य ते मृत्सुमपि प्रदास्यति स क्रोद्विजः।। तच्छत्व मानुषं लोके दुःखशेषं च भुंक्ष्व वै।। गतस्य तव राजेंद्र
श्रेयस्तव भविष्यति।। व्यतीते द्वादशो वर्षे दुःखस्यांतो भविष्यति।। अंतरिक्षाच्च पतितो यमदूतैः प्रणोदितः।। पति
तो यमदूताश्च विबुद्धो भयसंभ्रमात्।। अहो कष्टमिति ध्यात्वा क्षते क्षारावसेचनं।। स्वप्ने दुःखं महद्दृष्टं यस्यांतो नो
पलभ्यते।। स्वप्ने दृष्टं मया युक्तं किं तेमे द्वादशाः समाः।। गतेत्पर्द्धे तत्रस्थान्पुल्कसांस्तु स ससंभ्रमात्।। नेत्युचुः केचि
त्तत्रस्था एवमेवापरेब्रुवन्।। श्रुत्वा दुःखी तदा राजा देवान्शरणमीयिवान्।। स्वस्ति कुर्वंतु मे देवा शैव्यया भार्यया सह।।
नमो धर्माय महते नमः कृष्णाय वेधसे।। परावराय शुद्धाय पुराणायाव्ययाय च।। नमोस्तु बृहस्पतये नमः इंद्राय ते
नमः।। एवमुक्त्वा स तदा राजा युक्तः पुल्कसकर्मणि।। शवानां मूल्यकरणे पुनर्नष्टस्मृतिर्यथा।। मलिनो जटिलः कृ
ष्णो लकुटीविकलो नृपः।। नैव पुत्रो न भार्या तु तस्य वै स्मृतिगोचरे।। नष्टोत्साहो राज्यनाशात् श्मशाने निवसंस्तदा।। ७६।।
इति श्रीपद्मपुराणे हरिश्चंद्रोपाख्याने चतुर्दशोध्यायः।। १४।। सूत उवाच।। एकदा तु गतो रंतु बालकैः सहितो
बहिः।। ब्राह्मणस्यांनोतिदूरे रोहिताश्वः कुमारकः।। क्रीडं दृष्ट्वा ततो दर्भान् ग्रहीतुमुपचक्रमे।। कोमलान्नल्पमूलां

॥३२॥ श्वक्रमाद्ध्यात्यानुसारतः॥ अग्निहोत्री द्विधर्मिष्ठ उक्तोह स्तत्सुम्नेन चलतः॥ सलक्षणाश्च समिधः बर्हिरिध्मं सलक्ष
णं॥ पलाशकाष्ठान्यादाय अग्निहोमार्थकारणात्॥ मस्तके भारकं तेन खिद्यमानः पदे पदे॥ उदकस्थानमासा
द्य तदा वाक्यं तृषान्वितः॥ भुवि भारं विनिक्षिप्य जलस्थाने तदा शिशुः॥ श्रमतः सलिलं पीत्वा विश्रम्य च मुहूर्त
कं॥ वल्मीकोपरि विन्यस्तं भारं हर्तुं प्रचक्रमे॥ विश्वामित्रात्स्यात्तावत्तु कृष्णसर्पो भयावहः॥ आशीविषो महा
घोरो वल्मीकान्निर्गतस्तदा॥ तेनासौ बालको दृष्टो दृष्टमात्रः पपात ह॥ रोहिताश्वो मृतं दृष्ट्वा ययुर्बालागृहं ना
लयं॥ त्वरिता भयसंविग्ना ययुस्तं मातुरग्रतः॥ हे विप्रदंशितः पुत्रः क्रीडार्थं तु बहिर्गतः॥ अस्माभिः सहित
स्तत्र सर्पदंष्ट्रेण स्तस्ततः॥ इति तद्वचः श्रुत्वा वज्रपातोपमं तदा॥ पपात मूर्छिता भूमौ छिन्नेव कदली यथा॥
अथ तां ब्राह्मणो रुष्टः पानीयेनाभ्यषिंचयत्॥ मुहूर्ताच्चेतनां प्राप्ता ब्राह्मणस्तां तथाब्रवीत्॥ ब्राह्मण उवा
च॥ को निद्रासमयो यत्ते रात्रे आलानि रामुखं॥ किं न पश्यसि मां पादक्षालनाभ्यंजनं कुरु॥ ब्राह्मणेनैवमु
क्ता सा च किंचिद्वाक्यमब्रवीत्॥ रुरोद करुणां दीनां पुत्रशोकेन पीडिता॥ अश्रुपूर्णमुखी धूली धूसरा मुक्त
मूर्धजा॥ अथ तां कुपितो विप्रो राजपत्नीमभाषत॥ धिक् त्वां दुष्टे यं ग्रहे मम कार्यं विलुंपसि॥ अस्मत्कालेह्कु ॥३२॥

तस्माद्धि गृहात् तं मम भवेत्तनं ।। एवं निर्भर्त्सिता तेन क्रूरवाक्यैः पुनः पुनः ।। रुदित्वा करुणं प्राह विप्रं गद्गदया गिरा ।। स्वामि
न् मम सुतो बालः सर्पदष्टो मृतो बहिः ।। अनुज्ञां मे देहि भगवन् पुत्रं पश्यामि बालकं ।। दुर्लभं दर्शनं तेन संजातं मम
सुव्रत ।। इत्युक्त्वा करुणं बाला पुनरेव रुरोद ह ।। पुनस्तं कुपितो विप्रो राजपत्नीमभाषत ।। ब्राह्मण उवाच ।। शाठ्ये
दुष्टस्वभावा रे किं न जानासि पातकं ।। यः स्वामिवेतनं गृह्य तस्य कार्यं विलुंपति ।। नरके पच्यते सोऽनु महारौरव
पूर्वके ।। गृहीत्वा वेतनं यस्तु स्वामिकार्यं न कुर्वति ।। उषित्वा नरके कल्पं ततोसौ कुक्कुरो भवेत् ।। किमनेनाथ वाक्यै
र्धर्मसंबंधिनेन मे ।। यस्तु पापरतो मूर्खः क्रूरो निःस्नेहनः शठः ।। यदाचरति निःफलं तस्य भवेद्बीजमिवोष
रे ।। रक्षितेऽपि घृते किंचित्परलोके भयं पदे ।। एवमुक्त्वाथ सा विप्रं वेपमाना ब्रवीत्पुनः ।। राजपत्न्युवाच ।। कारु
ण्यं कुरु मे नाथ प्रसीद सुमुखो भव ।। प्रस्थापय मुहूर्तं मां यावद्द्रक्ष्यामि बालकं ।। दुर्लभं दर्शनं तस्य न जातं मम
सुव्रत ।। सूत उवाच ।। एवमुक्त्वाथ सा भूमौ निपत्य द्विजपादयोः ।। रुरोद करुणं बाला पुत्रशोकेन पीडिता ।। अथा
ह कुपितो विप्रः क्रोधसंरक्तलोचनः ।। ब्राह्मण उवाच ।। किं ते पुत्रेण मे कार्यं गृहकर्म कुरुष्व मे ।। किं न जाना
सि मे क्रोधं कशाघातफलप्रदं ।। एवमुक्ता स्थिता धैर्याद्गृहकर्म चकार ह ।। अर्धरात्रे गते तस्याः पादाभ्यंगादि

॥२३॥ कर्मणा॥ ब्राह्मणेनाथ सा प्रोक्ता कुरु पार्श्वं भुजाधुना॥ तस्य तद्वाहितं कृत्वा पुनरागच्छ सत्वरं॥ मनुष्यते यथा त्रा
तर्हि हर्मानमन्त्रेति च॥ ततस्ते सा किनी रात्रौ विलपंती जगाम सा॥ दृष्ट्वा पुत्रं मृतं शोकेन पीडिता॥ यूथभ्रष्टा कुरंगी
व विवत्सा सुरभी यथा॥ वाराणस्या बहिर्गत्वा क्षणाद्दृष्टुं निजं सुतं॥ शयानं रंकवद्भूमौ कांद्दर्भतृणोपरि॥
अयं मे तनयः प्राप्तो वस्थामनस्थां सुनिष्ठुरां॥ एहि मे संमुखं केन रोषितोसि वदाधुना॥ आयास्यभिमुखो नि
त्य मंबे स्नु केति वादिनी॥ गृहात्स्खलन्निदानीं तस्य पपात सा परिमद्दिनी॥ वज्रेणेव हता मूर्छिं संछिन्ना कदली यथा॥
पुनः संज्ञां चेतनां प्राप्य देहान्यां नालिंग्य बालकं॥ सन्मुखे वदनं न्यस्य रुरोदार्तस्वरैस्तदा॥ करभ्यां ताडनं चक्रे म
स्तकस्योदरस्य च॥ हा बाल हा शिशो वत्स हा कुमार कसुंदर॥ हा राजन्कुगतोसि त्वं पश्येमं बालकं निजं॥ प्रा
णेभ्योपि गरीयांसं भूतले पतितं मृतं॥ अथापश्यन्मुखं तस्य भूयो जीवितशंकया॥ निर्जीवं वदनं ज्ञात्वा मूर्छिता
निपपात ह॥ हस्तेन वदनं गृह्य पुनरेव समभाषत॥ शयनं त्यज रे बाल शीघ्रमुत्थाय मी यणं॥ निद्रां गां वर्ध्दते खेद
द्धि वा ह्यात निनादितं॥ मृतप्रेत पिशाचादि जंबुकीनीय क्षनादितं॥ मित्राणि ते गतान्यस्मात् छिशेघ्वक्वं कुतः स्थितः॥
सूत उवाच॥ एवमुक्त्वा पुनस्तन्वी करुणं प्ररुरोद ह॥ हा शिशो बाल हा वत्स रोहिताश्व कुमारक॥ रे पुत्र प्रतिशब्दं मे कस्मा ॥२३॥

त्वं न प्रयच्छसि ॥ तवाहं जननी वत्स किं न जानासि पश्य मां ॥ देशस्थाणां राज्यनाशं श्रुत्वा भ्रातृविरूपात्र ॥ यद्वा
सिद्धा ध्वजीवामि त्वां दृष्ट्वा पुत्र केवलं ॥ तेजस्मसमये विप्रैरादिष्टं यत्वनागतं ॥ दीर्घायुः पृथिवीराज्यं पुत्रपौत्र
समन्वितः ॥ शौर्यदानरतिः सत्यो गुरुदेवद्विजार्चकः ॥ मातापित्रोस्त्वप्रियपदस्त्वं सत्यवादी जितेंद्रियः ॥ इत्यादि
सकलं जातमसत्यमधुनासुत ॥ चक्रमत्स्यांकुशच्छत्र श्रीवृक्षस्वस्तिकध्वजाः ॥ तव पाणितले पुत्र कलशश्चाम
रंतथा ॥ लक्षणानि तथान्यानि तवांगे यानि संति च ॥ तानि सर्वाणि मोघानि संजातान्यधुनासुत ॥ हा राजन्पृथि
वीनाथ क्व ते राज्यं क्व मंत्रिणः ॥ क्व ते सिंहासनं छत्रं क्व ते स्वर्णं क्व तत्कृतं ॥ क्व सा योध्या क्व हर्म्याणि क्व गजाश्वरथप्रजाः ॥
सर्वमेतत्तथा पुत्र मां त्यक्त्वा क्व गतोसि रे ॥ हा कांत हा नृप गच्छ पश्य मां स्वसुतं प्रियं ॥ येन ते रंजिता वक्षः कुंकुमेनाव
लेपितं ॥ स्वशरीरस्यांगः पंकैर्विरालं मलिनीकृतं ॥ येन ते बालभावेपि मृगनाभिविनिर्मितं ॥ चर्चितं भालति
लकं तं गंधस्थेन कृपते ॥ यस्य वक्त्रं सदालिंगं स्नेहादे चुंबितं त्वया ॥ तन्मुखं मक्षिव्याप्तं तत्र हतां ते नराजितं ॥
हा राजन्पश्यते पुत्रं भूमिस्थं धूसरं कृतं ॥ हा दैव किं मया हृतं त्वं हृतं पूर्वजन्मांतरे ॥ यस्य कर्मफलस्येह न पारमुप
लक्षये ॥ हा पुत्र हा शिशो वत्स हा कुमार कसुंदर ॥ एवं तस्या विलापं तु श्रुत्वा नगरपालकाः ॥ आगतास्त्वरिता

 स्तस्याः पार्श्वमूचुः सुविस्मिताः ॥ जना ऊचुः ॥ कासि बाले च कस्यायं कस्मान्निर्जनवत्तिष्ठसि ॥ एकैव निर्भया कस्य
कस्मात्त्वमिह रोदिषि ॥ एवमुक्ता प्रसादात्सा न किंचिद्वाक्यमब्रवीत् ॥ भूयो भूयोपि सा पृष्टा तूष्णींभूता बभूव ह ॥
विलज्जा पातिदुःखार्ता बाष्पाकुललोचना ॥ अथ ते शङ्कितास्तस्याः रोमांचिततनूरुहाः ॥ संत्रस्ताः प्राहुरन्यो
न्यमुपेतास्तु पांडवाः ॥ नूनं स्त्री न भवेच्चेयं यतः किंचिन्न भाषते ॥ तस्माद्भूयाद्भवेद्देषा पूतना बालघातिनी ॥
शुभा चेत्तर्हि किं पत्तनन्निर्मार्गे तिष्ठते बहिः ॥ भक्षार्थमनपायान्नमानितः कस्यचिच्छिशुः ॥ इत्युक्ता सा गृहीता ते
गौडैः केशेषु सत्वरं ॥ भुजयोः स्पर्शे ग्रैव कैश्चापि गलके तथा ॥ खेचरी यास्वती त्युक्ते बहुभिः शस्त्रपाणिभिः ॥ आ
कृष्यमाणं नाना चांडालाय समर्पिता ॥ हे चंगल बहिर्देशे हन्यस्यानि बालघातिनी ॥ वध्यतां दत्त्वपक्षश्री
घ्नेनीता बहिस्त्रियं ॥ चंगलः प्राह तां दृष्ट्वा ज्ञातेयं लोकविश्रुता ॥ न दृष्टपूर्वा केनापि लोकेऽपि भाग्यनेकधा ॥ मस्ते
तान्यनया भूरि मंत्रद्भिः पुण्यमार्जितं ॥ ख्यातिप्रिया शांभवी लोके गच्छध्वं च यथासुखं ॥ द्विजस्त्रीबालगोघाती स्वर्ण
स्तेयी च यो नरः ॥ अग्निदो बालघाती च मद्यपी गुरुतल्पगः ॥ महाजनविरोधी च तस्य पुण्यप्रदो वधः ॥ द्विजस्त्री
पिस्त्रियो नापि नते वा विद्यते वधे ॥ अस्या वधश्च मे योग्ये इत्युक्ता ... बध्यते ॥ बध्या वै रोचपापस्य ...नी

त्राघतोऽदयत्॥ हरिश्चंद्र मथोवाचवान्वा परुषयातदा॥ रे दास त्वं वध्यतामेषा दुष्टामा त्वं विदारय॥ तदाकर्ण्य
भूपतिः स्त्रीत्वाव(ग्र)पातोपमं तदा॥ वेपमानोथ चांडालग्राह स्त्रीवधपरांङ्मुखः॥ न मुक्तो हमिहान्यस्मै प्रेष्यं दे
हि मन्नापरं॥ असाध्यमपि यत्कर्म तत्सर्वं साधयाम्यहं॥ चंडाल उवाच॥ माभैषि त्वं गृहाणासिं वधास्याशि
षतां शिरः॥ बालानामेव भयदाने यस्य त्वाकृदाचन॥ राजोवाच॥ स्त्रियो रक्ष्याः प्रयत्नेन न हंतव्याः कदाचन॥
स्त्रीवधे कीर्तितं पापं मुनिभिर्धर्मतत्परैः॥ पुरुषो यः स्त्रियं हन्याज्ज्ञानतो ज्ञानतोपि वा॥ नरके पच्यते सोथ महा
रौरव पूर्वके॥ चंडाल उवाच॥ मवहासिं मत्करेणेदं तीक्ष्णं विद्युत्समप्रभं॥ यत्रेक्षमिन्नधेनीते बहूनां तु सुखं
भवेत्॥ अस्या हिंसा कृता नूनं बहुपुण्यप्रदा भवेत्॥ भक्षितान्यनया भूरि डिंभानि दुष्टया॥ तक्षिप्रं
वध्यतामेषा लोकः स्वस्थो भविष्यति॥ राजोवाच॥ चांडालाधिप मे स्त्री धृतव्रतं स्त्रीवधवर्जने॥ आज्ञा नृतस्त
तो यत्नान्न कुर्यां स्त्रीवधं मम॥ चंडाल उवाच॥ स्वामि कार्यविनाशकं किं जल्पसि पतेपरं॥ महीयो वेतनं मेघ
कस्मात्कार्यं विलुंपसि॥ नरकाल्लिप्यति स्पेस्ते नास्ति द्रव्याधुनेरपि॥ राजोवाच॥ चांडालनाथ मे देहि प्रेष्यम
न्यत्सुदारुणं॥ स्वशत्रु क्रूरं हि संक्षिप्तं घातयिष्याम्यसंशयं॥ पातयिष्याभितं शत्रूंस्तव दासानि मे दिनं॥

॥३५॥ देवैर्वीरसैः सिद्धैर्गंधर्वैरपि संस्तुतं ॥ दृष्ट्वेंद्रमपि जेष्यामि निहत्य निशितैः शरैः ॥ एतच्छ्रुत्वा तु पतितो वाक्यं हरि
श्चंद्रस्य भूपतेः ॥ चांडालः कुपितः प्राह विदमानं महीपतिं ॥ चांडाल उवाच ॥ एतद्वाक्यं समुद्दिष्टं त्वया काकदासकी
र्त्तितं ॥ चांडालदासतां हत्वा सुराणां नाथ सेवनः ॥ दासकर्म कुरुनो लेन शृणु मे परमं वचः ॥ निर्लज्जानवचेदस्ति
किं विलाप भयं हृदि ॥ गृहाणेतततः खड्गमस्या छिंधि शिरो सदते ॥ गृहीतं वेतनं पूर्णं मया यतेप्रतिष्टतं ॥
एवमुक्त्वाथ चांडालो राज्ञे खड्गं न्यवेदयत् ॥१०॥ इति श्रीपद्मपुराणे पातालखंडे हरिश्चंद्रोपाख्याने पंचद
शोध्यायः ॥१५॥ सूत उवाच ॥ गतो थ भूपतिः प्राह राज्ञीं स्थित्वाग्रतो नुखः ॥ अत्रोपविश्यतां बाले पापस्य
पुरतो मम ॥ शिरस्ते छेदयिष्यामि हंतु शक्नोति चेत्करः ॥ एवमुक्ता समुद्यम्य सोपविष्टाग्रतो नृपं ॥ न जानाति
नृपः पत्नी सा न जानाति भूपतिं ॥ अब्रवीद्दुःखदुःखात्तो स्वमृत्युमभिकांक्षती ॥ स्त्र्युवाच ॥ चांडाल शृणु मे वाक्यं
किंचित्त्वं यदि मन्यसे ॥ मृतस्तिष्ठति मे पुत्रो नातिदूरे बहिः पुरात् ॥ निर्दहामि हतं तावत् दानपित्वा तवांतिकं ॥
तावत्प्रतीक्षतां पश्चाद् असिना घातयस्व मां ॥ तेनाथ बाढमित्युक्ता प्रेषिता बालकं प्रति ॥ सा जगाम सुदुःखा
र्त्ता विलपंती सुदारुणं ॥ भार्या तस्य नरेंद्रस्य सर्पदष्टं हि बालकं ॥ हा पुत्र हा वत्स हा शिशो इत्येवं वदती मुहुः ॥ ह ॥३५॥

रा विवर्णा मलिना पांसुध्वस्तशिरोरुहा ॥ स्मशानभूमिमागत्य बालं स्थाप्य विशांवि ॥ राज्ञ्युवाच ॥ राजेन्द्र
धः स्वबालं तं पश्यसी हम हीतले ॥ रममाणं स्वसखिभिर्दष्टं दुष्टाहिना मृतं ॥ तस्या विलापशब्दं तमाकर्ण्य स
नराधिपः ॥ द्रुतं वसन्निधिमागत्य वस्त्रमस्याक्षिपत्तदा ॥ तां तथा रुदतीं भार्यां नाभ्यजानाति भूमिपः ॥ चिरप्र
वासंतप्ता पुनर्जातामिवाबलां ॥ सापि तं चारुकेशं तं पुरोढस्कार्ज बालकं ॥ नाभ्यजानन्नृपवरं शुष्कवृक्षत्व
चोपमं ॥ भूमौ निपतितं बालं दृष्ट्वा शीविषपीडितं ॥ नरेन्द्रलक्षणोपेतं चिंतापन्नो नरेश्वरः ॥ अस्य पूर्णें
दुवद्वक्त्रं शुभमुत्तुंगसमं वुष्टं ॥ नीलाभ्रकेशान्कुंचितान्पश्य समांदीर्घांस्तरंगिणः ॥ राजीवसदृशे नेत्रे ओष्ठं
बिंबफलोपमं ॥ विशालवक्षा दीर्घाक्षो दीर्घबाहुर्नतांसकः ॥ विशालपादो गंभीरः सूक्ष्मगुल्फो वनीधरः ॥
चतुर्ले स्ववरो मत्स्यपवत्रक्षे कपर्वत ॥ मृणालपादो गंभीरनाभिरुच्चतरधरः ॥ अहो कष्टं नरेन्द्रस्य कस्याप्ये
ष कुले शिशुः ॥ यातो नीतः कृतांतेन कालपाशेन दुरात्मना ॥ सूत उवाच ॥ एवं दृष्ट्वा सुतं बाल मातुरंके प्रसारि
तं ॥ स्मृतिमभ्यागतो राजा हा हे सश्रून्यपात पत्र ॥ सोप्युवाच मे यं वत्सो मम तावस्थामुपागतः ॥ नीतो
यदि च घोरेण कृतांतेनाल्पनो वशं ॥ विचारयित्वा राजासौ हरिश्चंद्रस्तथा स्थितः ॥ ततो राज्ञीमहदुःखा वे

॥३५॥ त्मादिदमभाषत॥ राज्ञ्युवाच॥ हा वत्स कस्य पापस्य अवध्यानादिदं महत्॥ दुःखमापतितं घोरं यस्यांतो नोपल
भ्यते॥ हा नाथ राजन् भवता मा यया स्व सुदुःखितां॥ कस्मिन्न संस्थापयते स्थाने विश्रब्धं केन हेतुना॥ राज्यना
शः सुहृत्त्यागो भार्यातनयविक्रयः॥ हरिश्चंद्रस्य राजर्षेः किं विधातः कृतं त्वया॥ इति तस्या वचः श्रुत्वा रा
जा स्वस्थानतश्च्युतः॥ प्रत्यभिज्ञाय देवीं तां पुत्रं च निधनं गतं॥ कष्टं ममेव पत्नीयं बालकश्चापि मे सुतः॥
ज्ञात्वा पपात संतप्तो मूर्च्छामतिजगाम ह॥ सा च तं प्रत्यभिज्ञाय तामवस्थामुपागतं॥ मूर्छिता निपपातानि ता
श्चेष्टा धरणीतले॥ चेतनां प्राप्य राजेंद्रो राजपत्नी च तौ समं॥ विलेपतुः सुतं तप्तो शोकभारे प पीडितौ॥
राजोवाच॥ हा वत्स सुकुमारं ते स्वक्षिभ्रू नासिकालकं॥ पश्यतो मे मुखं दीनं हृदयं किं न दीर्यते॥ तात ताते
ति मधुरं ब्रुवाणं स्वयमागतं॥ उपगुह्य कदा चक्षे वत्स वत्सेति सौहृदात्॥ कस्य जानु प्रणीतेन पिंगेन क्षिति
रेणुना॥ मम मोत्तरीयमुत्संगं तथांगमलमेष्यति॥ रे बाल्य मम संभूत मनोहृदयनंदन॥ मया पापि पितृमातृ
त्रा विक्रीतो येन वस्तुवत्॥ गतं राज्यमशेषं मे सबांधवधनं महत्॥ दैवहीनान्न शीलेन दृष्ट्वा मे तनयः
स्तातः॥ अहं महाहि दष्टस्य पुत्रस्याननपंकजं॥ निरीक्षन्नपघोरेण विषेणाभिहृतोधुना॥ एवमुक्त्वा ॥३५॥

तमासाद्य बालकं वाष्पगद्गदः ॥ परिपूज्य च निश्चेष्टो मूर्छयाभिपपात ह ॥ ततस्तं पतितं दृष्ट्वा सो व्यावेक्ष्य चिंतयत् ॥
अयं सुपुरुषः स्याच्च स्वरेणैवोपलक्ष्यते ॥ विद्वज्जनमनश्चंद्रो हरिश्चंद्रो न संशयः ॥ तथास्य नासिका तुंगाभि
लंबमानोपमा शुभा ॥ दंताश्च मुकुलप्रख्याः ख्यातकीर्तेर्महात्मनः ॥ श्मशानमागतः कस्मादयमेवं स नरेश्वरः ॥
विहाय पुत्रशोकं सा पश्यंती पतितं पतिं ॥ प्रहृष्टा विस्मिता दीना भर्तृपुत्रार्त्तिपीडिता ॥ वीक्षंती सा तदापश्यत्पत्युर्
दंडं जुगुप्सितं ॥ श्वपाकार्हं ततो मोहं जगाम आयतलोचना ॥ प्राप्य चेतश्च शनकैः सगद्गदमभाषत ॥ धिक् त्वां दै
व करुण निर्मर्याद जुगुप्सितं ॥ येनायममरप्रख्यो नीतो राजा श्वपाकतां ॥ राज्यनाशं सुहृत्त्यागं भार्यातनयवि
क्रयं ॥ प्रापयित्वापि येनाय चंडालोयं कृतो नृपः ॥ हा राजन्नद्य संतापान्मामिह धरणीतलात् ॥ उत्थाप्य पाघनप
र्यंकमारोहेति किमुच्यते ॥ नाद्य पश्यामि ते छत्रं सिंहासनमथापि वा ॥ चामरव्यजने वापि कोयं विधिविपर्ययः ॥
यस्यास्य व्रजतः पूर्वं राजानो भृत्यतां गताः ॥ स्वोत्तरीयैः प्रकुर्वंति विरजस्कं महीतलं ॥ सोयं कपालसंलग्ने घटी
पटनिरंतरे ॥ मृतनिर्माल्यसूत्रांतर्लग्नकेशे सुदारुणे ॥ वसानिष्पंदसंशुष्क महापटलमंडिते ॥ भस्मांगारार्द्ध
दग्धास्थिमज्जासंघट्टभीषणे ॥ गृध्रगोमायुनादार्तपुष्टक्षुद्रविहंगमे ॥ चिताधूमायतरुचा नीलीकृतदिगं
तरे ॥ कुणपास्वादनमुदासंप्रहृष्टनिशाचरे ॥ चरत्यमेध्ये राजेंद्रः श्मशाने दुःखपीडितः ॥ एवमुक्त्वाथ संश्लिष्य कं

३७॥ हरिश्चन्द्रो नृपात्मजः॥ कथं स कौशिको विप्रो चित्रकूटापार्ने या गिरा॥ राजन्स्वप्नोथ तथ्यं वा यदेतं मन्यते भवान्॥ तत्कथ्यतां
महाभाग मनो वैक्लुप्तते मम॥ यदेतद्देवं धर्मज्ञ नास्ति धर्मे सहायता॥ तपे वा विप्रदेवानां पूजने पालने पि वा॥ नास्ति
धर्मः कुतः सत्यं नार्जवं नानृशंसता॥ यत्र त्वं धर्मपरमः स्वराज्यादवरोपितः॥ सूत उवाच॥ इति तस्या वचः श्रुत्वा नि
श्वस्यैव सगद्गदं॥ कथयामास तन्वंग्या यथा प्राप्तं स्वपाकतः॥ रुदित्वा सा तु सुचिरं निश्वस्यैव सुदुःखिता॥ स्व
पुत्रमरणं भीरुर्यथावृत्तं निवेदयत्॥ श्रुत्वा [illegible] राकं निपपात महीतले॥ मृतं पुत्रं समानीय जिह्वया
विलिहन्मुहुः॥ हरिश्चन्द्रमथोवाच दैन्याद्गद्गदया गिरा॥ कुरुष्व स्वामिनः प्रेष्यं छेदय्यतां शिरो मम॥ स्वामि
द्रोहेण ते सर्वं धर्मो मा सत्त्वो भव भूपते॥ मा सत्यं त्यज राजेन्द्र परद्रोहस्य पातकं॥ ग्रहीतं वेतनं यस्य स्वामी स्याद
न्यजोप्यसौ॥ न राज्ञाहं तथा सौख्यं मन्येतं दुःस्वमंजसा॥ एतच्छ्रुत्वा राजा तु पपात भुवि मूर्छितः॥ क्षणेन चेत
नां प्राप्य विलप्यातिदुःखितः॥ राजोवाच॥ कथं प्रिये त्वया प्रोक्तं वचनं ह्यति निष्ठुरं॥ यद्वाक्यं भवेद्दुःखं तल्ल
मंत्रिपते कथं॥ पत्न्युवाच॥ मया च पूजिता गौरी देवा विप्रास्तथा पि च॥ भविष्यसि पतिस्त्वं मे यच्चास्मिन्न्यात प
स्वमां॥ श्रुत्वा राजा तदा वाक्यं निपपात महीतले॥ मृतस्य पुत्रस्य तदा तु चुचुंबे दुःखितो मुखं॥ राजोवाच॥ प्रिये मे ॥३७॥

नरो चते दीर्घं बालं क्लेशामुपासितुं ॥ नालापतश्च तन्वंगी पश्यमे मंदभाग्यतां ॥ चंडाले नानुज्ञाते अवेद्य स्वल नंप्य
दि ॥ चांडाल दास्यतां यास्ये पुनरप्यन्यजन्मनि ॥ नरके च पतिष्यामि कीटकृमिभोजन ॥ वैतरिण्यां महापथ
वसासृक्पूयमूत्रपिच्छले ॥ असीपत्रवनं प्राप्य छेदनाश्चापि दारुणं ॥ तापं पश्यामि संप्राप्य महारौरवसंतके ॥
मग्नस्य दुःखजलधौ वरं प्राणवियोजनं ॥ एकोपि बालको योप मासी क्रूराकूरः सुतः ॥ मम तु दैवयोगेन मृतः सो
पि बलीयसा ॥ कथं प्राणान्विमुंचामि परायत्तोस्मि दुर्मतः ॥ अथवा पापसंश्लिष्टो नरः पापमवेक्ष्यते ॥ त्रैलोक्ये नास्ति
तद्दुःखं नासिपत्रवने तथा ॥ वैतरिण्यां कुतस्तद्धि या [illegible] रपुत्रविप्लुते ॥ सोहं सुतशरीरेण दीप्यमाने हुताशने ॥ नि
पतिष्यामि च तन्वंगि क्षंतव्यं तन्मया पुनः ॥ [illegible] मर्षितं किंचिदूतः कोमललोचने ॥ मम वाक्यं च तन्वंगि निवे
चाहतमानसा ॥ अनुज्ञाता यम यत्र पूर्वं विप्रस्य नुचितः स्थिते ॥ यदि दत्तं यदि हुतं गुरवो यदि तोषिताः ॥ संगमः
परलोकेपि राधपुत्रेण च त्वया ॥ इह लोके कृतस्नेहः दृश्यति समीहितं ॥ यन्मया हसता किंचिद्रहसि चाटु वि
ल्पितं ॥ अशोभनं कृतं सर्वं क्षंतव्यं मे नयास्यतः ॥ राजपत्नीति गर्वेण नावसेयः स ते द्विजः ॥ सर्वयत्नेन तोष्यः
स्यात्स्वामी दैवतवच्छुभे ॥ राज्ञ्युवाच ॥ अहमप्यत्र राजर्षे निपतिष्ये हुताशने ॥ दुःखभारासहा देव सहपास्या

॥ ३८ ॥ मिवैत्वया॥ त्वयासह मम श्रेयो गमनं नान्यथा भवेत्॥ सह स्वर्गं च नरकं सहैवायामि दुःखमे॥ श्रुत्वा राजा ततो वा
च एवमस्तु पतिव्रते॥ ७९॥ इति श्रीपद्मपुराणे हरिश्चंद्रोपाख्याने चतुर्दशोऽध्यायः॥ १४॥ सूत उवाच॥ ततः कृ
त्वा चितां राजा ज्वालयित्वा तनयं स्वयं॥ भार्यया सहितो राजा बद्धांजलिपुटस्तदा॥ चिंतयन् परमात्मानमीशानं ना
रायणं हरिं॥ हृत्कोटरगुहालीनं वासुदेवं सुरेश्वरं॥ अनादिनिधनं ब्रह्मरूपं पीतांबरधरं प्रभुं॥ तस्य चिंतयमान
स्य सर्वे देवाः सवासवाः॥ धर्मं प्रमुखतः कृत्वा समाजग्मुस्त्वरान्विताः॥ आगत्य सर्वे ते प्रोचुस्ते भो भो राजन् शृणु
प्रभो॥ अयं पितामहः साक्षाद्धर्मश्च भगवान् स्वयं॥ साध्याः सविश्वे मरुतो लोकपालाः सचारणाः॥ नागाः
सिद्धाः सगंधर्वा रुद्राश्चैव तथाश्विनौ॥ एते चान्ये च बहवो विश्वामित्रस्तथैव च॥ विश्वत्रयेण यो मित्रं कर्तुं न
शकितः पुरा॥ विश्वामित्रः स ते मैत्रीमिष्टं चाहर्तुमिच्छति॥ धर्म उवाच॥ मा राजन् साहसं कार्षीः धर्मोऽहं त्वा
मुपागतः॥ तितिक्षादमसत्त्वाद्यैस्त्वद्गुणैः परितोषितः॥ इंद्र उवाच॥ हरिश्चंद्र महाभाग प्राप्तः शक्रोऽस्मि
तेंतिकं॥ त्वयास भार्यापुत्रेण जिता लोकाः सनातनाः॥ आरोह त्रिदिवं राजन् भार्यापुत्रसमन्वितः॥ सुदुःप्रा
पं नरैरन्यैर्जितमात्मीयकर्मभिः॥ सूत उवाच॥ ततोऽमृतमयं वर्षमपमृत्युनिवारकं॥ इंद्रः प्रसृजदाकाशाच्चिताग्नि ॥ ३८ ॥

तामध्वजे गते त्रिदिवे ॥ पुष्पवर्षं ववृषुर्मुहुः दुंदुभिस्वनमेव च ॥ समुत्तस्थौ ततः पुत्रो राज्ञस्तस्य महात्मनः ॥ सु
कुमार तनुः स्वस्थः प्रसन्नः प्रीतमानसः ॥ ततो राजा हरिश्चंद्रः परिष्वज्य सुतं तदा ॥ सभार्यः स्वश्रिया युक्तो
दिव्यमाल्यांबरावृतः ॥ स्वस्थः संपूर्णहृदयो मुदा परमया युतः ॥ बभूव तु क्षणादिंद्रो भूपश्चैवमभाषत ॥ स
भार्यः सपुत्रस्त्वं स्वर्गलोकं गतिं परां ॥ समारोह महाभाग निजानां कर्मणां फलं ॥ हरिश्चंद्र उवाच ॥ देवराज म
नुज्ञातः स्वामिना श्वपचेन ह ॥ अक्रयानिष्कृतिं तस्य नारोक्ष्ये सुरमंदिरं ॥ धर्म उवाच ॥ तवैवं भाविनं क्लेशमव
गम्यात्ममायया ॥ आत्मा श्वपाकतां नीतो दर्शितं तच्च पक्कणं ॥ इंद्र उवाच ॥ प्रार्थ्यते यत्परं स्थानं समस्तैर्म
नुजैर्भुवि ॥ तदारोह हरिश्चंद्र स्थानं पुण्यकृतां नृणां ॥ हरिश्चंद्र उवाच ॥ देवराज नमस्तुभ्यं वाक्यं चेदं नि
बोधय ॥ प्रसीद सुमुखो यद्ब्रवीमि प्रश्रयानितः ॥ मच्छोकमग्नमनसः कोशले नगरे नराः ॥ तिष्ठंति तान्नया
स्येवं कथं यास्याम्यहं दिवि ॥ ब्रह्महत्या सुरापानं गोवधः स्त्रीवधस्तथा ॥ तुल्यमेभिर्महत्पापं भक्तत्या
गादुदाहृतं ॥ भजंतं भक्तमत्याज्यमदुष्टं संत्यजन् सुखं ॥ नेह नामुत्र पश्यामि तस्माच्छक्र दिवं व्रज ॥ य
दि ते सहिताः स्वर्गं मया यांति सुरेश्वर ॥ ततोहमपि यास्यामि नरकं वापि तैः सह ॥ इंद्र उवाच ॥ बहूनि पु

३७॥ न्यपापानि तेषां निर्जुला निवेश्य॥ कूपंत्व यासमो ऽप्यत्वं भूयः स्वर्गमवेप्स्यसि॥ हरिश्चंद्र उवाच॥ भुंक्ते स्म कृत्य
पौत्रराज्यं प्र[illegible] यद्यत्र ते च महा[illegible] कर्म कृतं करोति च॥ तच्चते पात्रभावेन मया सर्वमनुष्ठि
तं॥ उपकारं न तत्त्वस्ते [illegible] कृतं॥ तस्मात्स्व[illegible] किंचिदस्ति सुचेष्टितं॥ दत्तमिष्टमनोज्ञसि
सामान्यं ते स्तु कृत्स्नशः॥ [illegible] ॥ दुःखादिनमव्यके तैः समं [illegible]प्रसाद
तः॥ सूत उवाच॥ एवं भविष्यतीत्याह शक्रस्त्रिभुवनेश्वरः॥ प्रसन्नचेता धर्मश्च विश्वामित्रश्च गाधिजः॥
गत्वा तु नगरं सर्वं चातुर्वर्ण्यसमाकुलं॥ हरिश्चंद्रस्य निकटे प्रोवाच नृप[illegible]॥ आगच्छंतु जनाः शीघ्रं
स्वर्गलोकं सुदुर्लभं॥ धर्मप्रसादात्संप्राप्तं सर्वे युष्माभिरेव तु॥ हरिश्चंद्र[illegible] लोकान्नगरवासि
नः॥ [illegible] दिवमारुरोह [illegible]॥ सूत उवाच॥ तदिंद्रस्य च वचः [illegible] प्रीतास्तस्य च भूपतेः॥
ये संसार[illegible]॥ [illegible] प्रहृष्टमनसो दिवमारुरुहुर्जनाः॥ विमानं च समारूढाः
सर्वे भास्वरविग्रहाः॥ तदा स भूपतिः श्रीमान्हरिश्चंद्रस्य पार्थिवाः॥ राज्येऽभिषिक्तवान्पुत्रं रोहिताश्वं महाम
नाः॥ रोहिताश्वं च पुरे रम्ये हृष्टपुष्टजनान्विते॥ सहदेवेश्च मुनिभिः [illegible] साधिपः॥ तनयं स्तु[illegible] ॥३७॥

श्वापि प्रतिपूज्याभिनंद्य च॥ संप्राप्य भूमिमतुलां विमाने स महीपतिः॥ आरोप्य चक्रे कामगमे क्षुद्रपंच
विराजिते॥ ततस्तस्यार्द्धमालोक्य लोकमात्रो राजा जगौ॥ दैत्याचार्यो महाभागः सर्वशास्त्रार्थतत्ववि
त्॥ उवाच॥ अहो तिर्थीक्षाम्य माहात्म्यमहो दानफलं महत्॥ यत्तागतो हरिश्चंद्रो महेंद्रस्य सलोकतां॥ सूत उवाच॥ इतीदं सर्वमाख्यातं हरिश्चंद्रस्य चरितं॥ यः [illegible] स [illegible] श्चात्रैव स सुखं लभते
महत्॥ [illegible] र्गोथ पर [illegible] तमातृपात्र॥ [illegible] ज्या पउरा
ज्यन कृतु पद्य॥ अतः परं कथा [illegible] तान्द्विजसत्तमा॥ [illegible] विष्णु कथा भवति तत्क्ष
णे॥ इति श्रीपद्मपुराणे हरिश्चंद्रोपाख्याने सप्तदशोऽध्यायः॥ १७॥ सूत उवाच॥ राज्यं च्यु
ते हरिश्चंद्रे गते च त्रिदिवालयं॥ निश्च [illegible] तेजा जल [illegible] पुरोहितः॥ [illegible] वसिष्ठो [illegible] ते
गंगावासकृतिः तो मुनिः॥ [illegible] विश्वामित्रस्य चेष्टितं॥ हरिश्चंद्रस्य राज्ञस्य नाशं चो
दारकर्मणः॥ [illegible] विक्रमं॥ स च्छ्रुत्वा च महाभागः प्रीतिमान् अवनीपतेः॥
चकार कोपं तेजस्वी॥ [illegible] वसिष्ठ उवाच॥ मम पुत्रशतं तेन विश्वामित्रेण घातितं॥

॥४०॥ तथापि नाम वक्रो भ्रस्तादृशो यादृशो ध्वने॥ महात्मानं शापि पमिमं स्वराज्यादवरोपितं॥ महात्मानं महाभागं
देवब्राह्मणपूजकं॥ यस्मात्तस्य एवाकुरुंप्ते शापमावपि विमत्सरः॥ अनागास्त्वति धर्मात्मा ह्यप्रमत्तोऽप्र
साम्प्रयः॥ स पुत्रदारो धर्मात्मा प्रापितो वादृशांवयः॥ स्वराज्यो दूंसितस्तेन बकुशश्चरिवलीकृतः॥ तस्मा
दुरात्मा ब्रह्मद्विड् यज्वि नामेवमंतद्धः॥ मच्छापोपहतो भूत्वा स बकत्वमवाप्स्यसि॥ सूत उवाच॥ प्रत्यापग
पं महातेजा वाशिष्टं प्रतिकौशिकः॥ त्वम पाडीभवस्वेति प्रतिशापमयच्छत॥ अन्योन्यशापतो प्राप्तौ तिर्यक्
त्वं परमद्युती॥ अन्योन्यजातीसमायायो गंगाता वपुमितौ जसौ॥ युयुधाते तिसंरब्धौ महाबलपराक्रमौ॥
योजनानां सहस्रे द्वे प्रमाणे नाडी रक्षितः॥ षण्णवत्याधिकं ब्रह्मन् सहस्राणित पंचकः॥ तौतुपक्षप्रहारा
ग्रेरन्योन्यपरिविक्रमौ॥ प्रहरंतौ भयं तीव्रं प्रजानां चक्रतुस्तदा॥ पयपत्राणि बकोरक्तेक्षणो हन्नर॥
आडी स्पृष्टुन्नत शिखिलोकं पाप्नतोऽपतत्॥ तयोः पक्षानिलाघात प्रासात्ताः पपेतुर्गिरयो भुवि॥ गिरिपातात
भिहता च वकंपे च वसुंधरा॥ द्वानार्णव भासोन्मत्ता दधी नूर्ध्वतां वृक्षकारह॥ नानाद्वैपेक पाश्चे निपाता लग्न
मनोत्सुका॥ केचिद्गिरिनिपातेन केचिद्विदर्भोऽपि वारिणा॥ केचिन्महीसंचलनात्र प्रययुः प्राणिनः क्षयं॥ ॥४०॥

इति सर्वे परित्रस्ता हाहाभूतमचेतनं ॥ जगदासीत्सुसंभ्रांतं पर्यस्तक्षितिमंडलं ॥ हा वत्स हा कांत त्रिशंकोप
पवोयोस्मिन्संस्थितः ॥ हा प्रिये कांत त्रैलोक्ये पतत्यस्मिन्नुपलायतां ॥ इत्याकुलीकृते लोके संत्रासात्विमुखे
तदा ॥ सुरैः परिवृतैः सर्वै राजगाम पितामहः ॥ दृष्ट्वा प्रोवाच विश्वेशस्तावुभावतिकोपितौ ॥ युद्धं विरा
मं मन्येत लोकाः स्वस्थ्यं व्रजंतु वै ॥ श्रुण्वतावपि तौ वाक्यं ब्रह्मणोव्यक्तजन्मनः ॥ कोपामर्षविवृत्ताक्षौ यु
युधाते न संस्थितौ तस्थतुः ॥ ततः पितामहो देवस्तद्दृष्ट्वा लोकसंक्षयं ॥ तमोश्चहितमन्विच्छन्तौ तीर्थकु
भावमपाकरोत् ॥ ततस्तौ पूर्वदेहस्थौ प्राह देवः प्रजापतिः ॥ युद्धस्त तामसं भावं वशिष्ठ त्वं कुशिकर्षभौ ॥ शृ
णु वत्स वशिष्ठ त्वं त्वं च कौशिकसत्तम ॥ तामसं भावमाश्रित्य सद्दक्रयुद्धं चिकीर्षितं ॥ राजर्षि पूर्वपाकाय
हरिश्चंद्रस्य भूपतेः ॥ युद्धमेतद्विग्रहश्चाप पृथिवीक्षयकारकं ॥ न चापि कौशिकश्रेष्ठस्तस्य राज्ञोप
राध्यति ॥ स्वर्गप्राप्तिकरो ब्रह्मन्नुपकारपदे स्थितः ॥ तपसोपि भवंतौ रो महाक्रोधावसंमृतौ ॥ परि
त्यजातान्यंतरौ जतं भद्रं वा ब्रह्मोह्यवचतुरंतकं ॥ एवमुक्तेथ तस्तेन लज्जितौ तौ ताबुभावपि ॥ क्षमया
मासतुः प्रीत्या परिष्वज्य परस्परं ॥ ततः सुरैर्वंद्यमानो ब्रह्मा लोकं निजं ययौ ॥ वशिष्ठोप्याश्रमस्था

४१

[illegible] ॥ [illegible] पृथ्वीपतिपेमर्स [illegible] प्रभु [illegible]

[illegible] न [illegible] नविभिर्व्यंत [illegible] ॥

[illegible] प्राश्रव [illegible] स्याप [illegible]

[illegible] यच [illegible]

[illegible] इतिश्रीपद्मपुराणे

पाताल [illegible] ॥ [illegible]

[illegible] ॥ १७ [illegible] प्रभा [illegible] ॥ [illegible] तोष्ठानु [illegible] ॥ [illegible] हरिः [illegible]

[illegible] हरिश्चंद्रोपाख्याने [illegible] ॥ १७ ॥

इतिहरीच्चंद्रोपआख्यानेअष्टादशमोध्याः॥१८॥पत्रसंख्या॥४१॥वीष्णुखोंडस्ये

[OrderDescription]
,CREATED=02.06.20 14:51
,TRANSFERRED=2020/06/02 at 15:00:42
,PAGES=83
,TYPE=STD
,NAME=S0003057
,Book Name=M-2962-HARISHCHANDRO PARUYAN
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF

FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF

FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF

FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF

FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF

FILE82=00000082.TIF
,FILE83=00000083.TIF
,